नं: — ४९८१

ग्र.नाम. भैरवार्च्चा पारिजात:

कर्ता. श्री जैत्र सिंह देव:

पत्र सं. १०६ —— सं. x

विषय: तन्त्रम्.

भैरवार्चापारिजातः

४९७१

4971

#1 Missing
F. = 106

जलदनुजलीलमदेवभूयः प्रत्यर्थिभूपकुलसंहरणैकदक्षः प्रादुर्बभूव भुवि भूषणखर्गदः खगा
ढ्यं यकारदलनोद्भटवेडमात्तुः ८ हरिहरदेव महीयसस्मा जातो वघेलकुलदीपः यस्य क्रोधयद्भ्रा
प्रोप्रतिभटभूयाः पतंगतां यांति ९ तत्पुत्रो जैत्रसिंहः सकलनृपगुणालंकृतः शंकरस्य श्रीपादां
भोजभक्तः स्वचरितचरणे देवभक्तोऽप्रमत्तः गुरुं श्रीभैरवस्य प्रथयितुमखिलानागमान् श्रीगुरु
भ्यो ज्ञात्वा पूजाविधानं प्रगटयति मुदे साधकानां रहस्यं १० प्रातःकृत्यं ततः स्नानविधिः संध्या च तर्पणं
सूर्यार्घ्यदानविधिवन्मंडपद्वारपूजनं मंडपस्य प्रवेशं च स्वासनस्याथ कल्पनं पूजाद्रव्यासादनं च
भूतशुद्धिमतः परं प्राणप्रतिष्ठाविधिवन्मातृकान्यासनं तथा दशधा तस्य भेदाश्च प्राणायामविधिः
ततः न्यसनं योगपीठस्य ऋष्यादिन्यासपूर्वकं ततस्तु मूलमंत्रांगन्यासान्योन्यसनं तथा मुद्राविर
चनं न्यासे मानसार्चनमेव च ततोऽन्तर्वैश्वदेवस्य विधिर्वाह्यार्चनस्य च पूजाचक्रस्य रचनाप्रकारं च ततः
परं अर्घ्यादीनां तु पात्राणां स्थापनं वाह्यपूजनं ततोऽन्तर्हवनं चैव पीठपूजाविधिस्ततः आवाहनं
च देवस्य उपचारांस्तथैव च ततो गायत्रिदेवानामर्चनं धूपदीपयोः नैवेद्यस्य विधिं चैव तांबूलं तथा
नरम् प्रसन्नार्घ्यविधिं चैव नीराजनविधिं तथा ततो नित्यजपस्यापि विधिं तस्य समर्पणं ततः स्तो
त्रस्य पठनं प्रदक्षिणनमस्क्रिये विसर्जनं च देवस्य पूजाशेषसमापनं गुरोस्क्रियाविधानं च ततोऽद्य

न्समयानपि नैमित्तिकार्चनं काम्यपूजनं तदनंतरं बलिदानविधिं चैव काम्यहोमविधिं तथा अभिषे
कविधिं चैव प्राणांजनविभेदतः अन्यानि काम्यकर्माणि नानातंत्रोदितानि च श्रीगुरोश्च वशिष्यस्य
लक्षणानि समासतः मंत्रदोषान्संस्कारान् तत्रादिषु विभेदतः मंत्रमेलनचक्राणि वास्तुयागं ततः
परं प्राचीसाधनपूर्वं च मंडपस्यापि लक्षणं वेद्याश्चैव च कुंडानां लक्षणं वाङ्कुरार्पणं मासर्तुपक्षदि
तिथिः वारयोगशुभाशुभान् करणानि च दानायाः कालभेदांस्तथापरान् वरणं श्रीगुरोश्चैव गुरोः
कृत्यानि सर्वशः सर्वतोभद्रनिर्माणप्रकारं स्थापनं तथा कुंभस्य कुंडसंस्कारान् अग्निस्थापनमेव च ल
क्षणानि तथा दीक्षातत्त्वे दीक्षायाः सप्रभावा अत्रोचितमथान्यच्च यदुक्तं समासतः भैरवार्चापारिजाते अ
ये स्मिन्नतिस्फुटं यथागमं यथाबोधं प्रवक्ष्ये साधुसंमतं तत्र श्रीमान्साधकेंद्रो ब्राह्मे मुहूर्ते समु
त्थायावश्यकं कृत्वा हस्तौ पादौ प्रक्षाल्य रात्रिवासः परित्यज्य धौते वाससी परिधायाचम्य देवताया
गमंदिरं प्रमार्ज्य गोमयेनोपलिप्य वितानादिभिरलंकृत्य तत्रासने समुपविश्य पूजामुद्रां तं
निर्माल्यमपकृष्य पूर्वदिनपूजावशिष्टपात्रादिनां मूलमंत्रेण त्रिरभ्युक्ष्य पाद्याचमनीये दत्वा दे
वाय दंतधावनगंडूषमुखप्रक्षालनादि कृत्वा पुनराचमनीयं निवेद्य स्वशिरसि सहस्रदलक
र्णिकायां श्रीगुरुं श्वेतवस्त्राभरणभूषितं वराभयकरं चंद्रकांतनिभं स्वप्रसन्नं स्मितगंधानुलेपनं

श्वेतमाल्यविभूषितेवामांकगतपार्वतीवस्त्राभरणगंधमाल्यविभूषितयावामकरधृतलीलाकमलयादेव्या
दक्षिणभुजेनालिंगितेहृदिनेत्रेशांतमेतमस्वंशिवरूपिणंध्यात्वा तच्चरणारविंदयुगलस्रुतपीयूषधारया
स्वदेहमभिषिक्तंसंचिंत्य श्रीअमुकानंदनाथश्रीपादुकांपूजयामितितद्गुरुणाकृतसंकेतनाम्नातदत्ताने
ऽ श्रीगुरुभ्योनमः श्रीगुरुपादुकेभ्योनमः इतिमंत्रेणवागंधादिभिर्मानसैर्वाह्यैर्वासंपूज्य आनंदमानं
दकरंप्रसन्नंज्ञानस्वरूपंनिजभावयुक्तं योगींद्रमीड्यंभवरोगवैद्यंश्रीमद्गुरुंनित्यमहंनमामि इतिप्रणम्य
ह्रांवांहृदयायनमः इतिहृन्मंत्रेणस्वहृदिलयंभावयेत् ततोमूलाधारादिब्रह्मरंध्रांतेउद्यत्सूर्यसहस्र
प्रभंसुषुम्नांतस्तेजोदंडनिभंमूलमंत्रंध्यात्वा ततेजसात्मनःस्वशरीरंसंचिंत्य वक्ष्यमाणविधिनामू
लमंत्रेणप्राणायामत्रयंकृत्वा वक्ष्यमाणऋष्यादिकरषडंगन्यासान्विन्यस्यहृदयकमलेवक्ष्यमाणरू
पंदेवंध्यात्वा मानसैरुपचारैःसंपूज्य मूलमंत्रंयथाशक्तिजपित्वा देवायजपंसमर्प्य स्तुत्वाप्रण
म्य त्रैलोक्यचैतन्यमयादिदेवश्रीभैरवनत्वच्चरणात्तथैव प्रातःसमुत्थायतवप्रियार्थंसंसारयात्रा
मनुवर्तयिष्ये संसारयात्रामनुवर्तमानंतदाज्ञयाभैरवदेवदेव स्पर्धातिरस्कारकलिप्रमादभया
निमामाभिभवंतुनाथ इतिप्रार्थ्य देवाज्ञामादाय समुद्रमेखलेदेविपर्वतस्तनमंडले विष्णुप

भै॰पा॰
३

त्रिनमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य स्वासानुसारेण तस्योपदं निधाय श्रीभैरवरू
पदीर्यीत्याषपदे पदे हूं वः अस्त्राय फडित्यस्त्रमंत्रेम्मरन् ग्रामाद्बहिः नैरृत्यां याम्यां वा दिशि शि
रस्युत्तिप्रहरमतीत्य यथाविधि मूत्रोत्सर्गशौचाचमनादिकं विधाय निषिद्धदिने विहितं दंता
काष्ठमादाय क्लीं कामदेवाय सर्वजनप्रियाय नमः इति मंत्रेण दंतधावनं विधाय दंतकाष्ठं प्रक्षा
ल्य पुरतः शुद्धदेशे परित्यज्य मूलमंत्रेण मुखं प्रक्षाल्य कुशतिलयवगोमयादन्तकुसुमयौतव
स्त्राण्यादाय अस्त्राभिमंत्रितपुंडकेनास्तुचिस्थानात् मृत्तिकां च गृहीत्वा जलाशयं गत्वा हूं वः अ
स्त्राय फडित्यस्त्रमंत्राभिमंत्रितजलेन तीरं प्रक्षाल्य तत्रास्त्राभिमंत्रितं कुशादिकं निधायोद्धृतजलेन ती
र्थाद्बहिः कटिशौचं कृत्वा स्वगृह्योक्तविधिना वैदिकस्नानं विधाय तदंगतर्पणं कृत्वा तीरं ग
त्वा हूं वः अस्त्राय फडित्यस्त्रमंत्रेण मृत्तिकामादाय प्रोक्तास्त्रमंत्रेणैवाभिमंत्र्य हूं त्वा शिखायै व
षडिति शिखामंत्रेण तृणादिकं निरस्य मूलमंत्रेण त्रिरभिमंत्र्य तया मृज्जिकया मूर्द्धादि पादांतं वि
लिप्य वक्ष्यमाणस्त्रमस्त्रीकरणमुद्रां वद्ध्वा प्राणवायुं निरुध्य जलांतः प्रविश्य त्रुल्लो निमज्ज्योन्मज्ज्य
नाभिमात्रे जले स्थित्वा अद्येत्यादि श्रीभैरवप्रीत्यर्थं तांत्रिकस्नानं करिष्ये इति संकल्पं कृत्वा मूलमं

त्रेण प्राणायामत्रयं मूलमंत्रस्य ऋष्यादिकरषडंगन्यासं च कृत्वा स्वपुरतः जले हस्तमात्रे चतुरस्रं
तीर्थं परिकल्प्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्येन देवेश तीर्थं देहि दिवाकर इति
सूर्यात् तीर्थं प्रार्थ्य क्रौं इति अंकुशमुद्रया सूर्यमंडलं भित्त्वा गंगे च यमुने चैव गोदावरि सरस्वति
नर्मदे सिंधु कावेरि जलेऽस्मिन्संनिधिं कुरु इति सूर्यमंडलात् तीर्थमावाह्य पुरःकल्पिततीर्थ
मंडले संयोज्य तत्र सर्वानंदमयीमशेषडविन्नध्वंसां मृगांकप्रभां अंतर्वार्द्रकरद्वयेन दध
तीं पाशसृणिं चक्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं मुक्तादाममालां वरं गंगामासिंधुसरि-
द्वयादिसहितां श्रीतीर्थशक्तिं भजे इति तीर्थशक्तिं ध्यात्वा ऐं ह्रीं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंद
मये तीर्थशक्ति एह्येहि स्वाहा ॐ तीर्थशक्त्यै नमः इति तीर्थशक्तिं संपूज्य तत्र ह्रींकारेण लो-
डं वमिति धेनुमुद्रया अमृतीकृत्य हूं वं कवचाय हुं इति कवचमंत्रेण अवगुंठनमुद्रया अवगु-
ठ्य हूः वः अस्त्राय फडिति अस्त्रमंत्रेण छोटिकाभिः संरक्ष्य तत्र सचक्रं सांगावरणं देवं ध्यात्वा
जलमयैः पंचोपचारैः संपूज्य संहारमुद्रया देवं विसृज्य मूलमंत्रेण अष्टवारमभिमंत्र्य
तत्र मूलमंत्रं जपन् हृदि देवं स्मरन् त्रिमज्ज्यान्मज्ज्य कुंभमुद्रां बध्वा मूलमंत्रेण स्वशिर

भै॰पा॰
८

स्तित्रिरभिषिंच्य आधारः सर्वभूतस्य विशेषतस्तु ललितेजसः तद्रूपाश्च ततो जाता आपस्ताः प्रणमाम्य
हं इति तीर्थजलमुपस्थाय ॐ वं सिसृक्षोर्निखिले विश्वं ब्रह्मणः श्रीकंठप्रजापते मातरः सर्वभूता
नामापो देव्यः पुनंतु मां ॐ वं आपो इति सप्तशिरः प्रोक्ष्य अलक्ष्मीं मलरूपायाः सर्वभूतेषु संस्थितां
क्षालयंति निजस्पर्शादापो नित्यं पुनंतु मां इति मंत्रेण चात्मानमभ्युक्ष्य पत्न्येके शेषुदो भाग्यंसीमं
ते यज्ञमूर्द्धनि ललाटे कर्णयोरक्ष्णोरायसंतत्त्रं तवीनमः इति प्रणम्य मूलमंत्रेण स्वाहांते नवि

५

देवं विरज्य

रावमस्य मूलेन वत्रिः सेतर्प्य तीरमागत्य धौते वाससी परिधाय करौ च मृदाद्भिः प्रक्षाल्याच
म्य ब्राह्मणस्योर्द्ध्वपुंड्रं स्यात् क्षत्रियस्य त्रिपुंड्रकं वैश्यस्य पुंड्रमर्द्धचंद्रं शूद्राणां वर्त्तुलाकृति इति नार
दपंचरात्रोक्तं सवर्णविहितं तिलकं आदौ विधाय विना भस्मत्रिपुंड्रेण विना रुद्राक्षमालया
पूजितोपि महादेवो न स्यात्फलदो भवेदिति लिंगपुराणवचनात् शिवपूजांगभूतं भस्मत्रिपुं
ड्रं धारयेत् अग्निहोत्रोद्भवं वा वक्ष्यमाणविधिना संस्कृतं शिवाग्नावेतद्विशेषं हि तत्कपिलागोम
येपी डेप्सुषं मूलमंत्रेण दग्धं देवागारसनात्सर्वमेवष्टहीनमपक्वातिपक्वरहितं वस्त्रेण शोधितं क
र्पूरादिसुवासितं भस्म संगृह्य संस्थाप्य तेन वा त्रिपुंड्रधारणं कुर्यात् तत्प्रकारस्तु मूलमंत्रेण आ

णायोमन्त्रयंकृत्वा शिरसिपिप्पलादऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीरुद्रायदेवतायै
नमः गुह्येअघोरबीजायनमः पादयोः भस्मशक्तयेनमः ममभोगार्थेभस्मधारणेविनियोगः
इतिहृदयादिन्यासंविधाय अंगुष्ठयोःकालायनमः तर्जन्योःकलविकरणायनमः शिरसेस्वाहा
मध्यमयोःदलविकरणायनमः शिखायैवषट् अनामिकयोःवलप्रमथनायनमः कवचायहुं
कनिष्ठिकयोःसर्वभूतदमनायनमः नेत्रत्रयायवौषट् करतलपृष्ठयोः मनोन्मनायनमः अ
स्त्रायफडितिविन्यस्य हृदयशिरसिशिखाकवचनेत्रेषुप्रोक्तमार्गेणमंत्रान्विन्यस्यअस्त्रमंत्रेण
तालत्रयंदशदिग्बंधनंचकृत्वा विभूतेर्भूतिमानासीद्वामदेवःसदाशिवः रक्षार्थंयस्यपादेवीदत्त
मामनघेसदा इतिविभूतिंप्रणम्य ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमः भवेभवेनादिभवे
भजस्वमांभवोद्भवायनमः १ ॐवामदेवायनमोज्येष्ठायनमोरुद्रायनमः कालायनमः कलवि
करणायनमोवलविकरणायनमोवलप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायन
मः २ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वतःसर्वसर्वेभ्योनमस्ते ३ स्तुरुद्ररूपेभ्यः ३ तत्पु
रुषायविद्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ४ ईशानःसर्वविद्यानामीश्वरःसर्व

भै॰पा॰
५

भूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ५ इतिमंत्रान्पठित्वाविभू-
तिमादाय वामकरेनिधाय भस्माभिमंत्रणमंत्रस्यऋष्यादिन्यासंकुर्यात् तत्राशिरसिअथर्वशि
राऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीरुद्रदेवतायैनमः इतिविन्यस्य ॐअग्निरितिभ
स्मवायुरितिभस्मजलमितिभस्मसर्वंहवाइदंभस्ममनइत्येतानिचक्षूंषिभस्मानिइत्यभिमंत्र्य
ॐआपोवाइदंविश्वाभूतान्यापःप्राणावाआपःपशवआपोमृतमापोन्नमापःसम्राडापोविरा
डापःस्वराडापश्छंदांस्यापोज्योतींष्यापःसत्यापःसर्वादेवताआपोभूर्भुवःस्वरापॐइतिमंत्रेणाभि
षिंच्य ॐमानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषः मानोवीरान्रुद्रभामि
नोवधीर्हविष्मंतःसदमित्वाहवामहे इतिमंत्रेणसंमृज्य द्विधाकृत्वाएकेनभागेनईशानःसर्ववि
द्यानामितिप्रागुक्तमंत्रेणशिरसितत्पुरुषायेतिमंत्रेणमुखे अघोरेभ्यइतिमंत्रेणबाह्वोः वाम
देवायेतिमंत्रेणकंठादिनाभ्यंते सद्योजातेतिमंत्रेणऊरुमूलादिपादाग्रपर्यंतंइतिसर्वांगेषुभ
स्मोद्धूलनंकृत्वा हस्तौप्रक्षाल्य द्वितीयंभागमादायतस्माद्भस्मतदेतत्पाशुपतं पशुपाश
विमोक्षायइतिमंत्रेणएकादशवारमभिमंत्र्य शिरसि ॐऐंह्रींहरहर ॐनमःशिवाय ल

५

ललाटेब्रह्मणेनमः हृदयेहव्यवाहनायनमः नाभौस्कंदायनमः कंठेधर्मेनमः दक्षिणबाहुमूले रुद्रायनमः बाहुमध्येआदित्यायनमः मणिबंधेचंद्रायनमः वामबाहुमूलेवामदेवायनमः बाहुमध्येप्रभंजनायनमः मणिबंधेवसुभ्योनमः पृष्ठेहरायनमः ककुदिसंभवेनमः ब्रह्मरंध्रेप रमात्मनेनमः इतित्रिपुंड्धारणंकृत्वा वैदिकींसंध्यांकृत्वा तांत्रिकसंध्यांकुर्यात् अयंभस्मधा रणविधिः ब्राह्मणानामेव अन्येषांतुपंचाक्षरेणमूलमंत्रेणवात्रिपुंड्धारणंकार्यमिति अथतांत्रि कसंध्यातत्रमूलमंत्रेणशिखांबध्वा मूलेनैवप्राणायामत्रयंकृत्वा मूलमंत्रस्यऋष्यादिकरष डंगन्यासान्विन्यस्य स्वपुरतोयेनमद्वयापात्रेमृत्तीकृत्य मूलमंत्रेणाष्टवारमभिमंत्र्य तज्जलबिं दुभिः कुशैरकारादिक्षकारांतैरेकपंचाशद्क्षरैः जलबिंदुभिः प्रत्यक्षरंस्वशिरः प्रोक्ष्यमूलेन चत्रिःप्रोक्ष्यसूर्यमंडलेयथोक्तरूपंदेवंध्यात्वा दक्षिणकरेणजलमादाय वामकराग्रेणस्पृशन् लं वंरंयंहंइति पांचभूतिकबीजैःसप्तवारमंत्र्य तज्जलंवामकरेनिधाय तदंगुलिनबिंदुभिर्मूलमं त्रेणादक्षिणकराग्रेणस्वशिरसित्रिः प्रोक्ष्यावशिष्टंवामकरस्थंजलंवामनासासमीपंनीत्वा तेजोमयंवामनासारंध्रेणस्वदेहांतः प्रविष्टंध्यात्वा तेननजलेनस्वदेहांतस्थसकलकलुषंप्रक्षाल्य

११

कृत्स्नवर्णं तज्जलं दक्षिणनासापुटेन विनिर्गतं विभाव्य दक्षिणकरेणादाय स्ववामभागे ज्वलद्व
ज्रशिलायां ॐ ह्लीं पशु हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यामास्फाल्य हस्तौ प्रक्षाल्य पुनर्दक्षिण
करेण जलमादाय दक्षिणनासापुटेन प्रविश्य ब्रह्मरंध्रस्थित चंद्रमंडलमध्यगतपीयूषवारिणो
मिलित्वा तन्मयेन राजदंतविवरांतराभ्यां विनिर्गतं विभाव्य तज्जलं वामकरे निधाय तज्जलबिंदु
भिः ॐ अमृतमालिनी स्वाहा इति मंत्रेण स्वशिरस्त्रिः प्रोक्ष्य मूलमंत्रेण स्वाहांतेन त्रिराचम्यांजलि
ना जलमादायोत्थाय वक्ष्यमाणगायत्रीसमुच्चार्य श्रीभैरवाय पशवे ऽर्घ्यं स्वाहा इति त्रिरर्घ्यांजलिं
सूर्याभिमुखमुत्क्षिप्य मूलमुच्चार्य श्रीभैरवं तर्पयामि नमः इति त्रिः संतर्प्य प्राग्वत् प्राणाया
मादि ऽकृत्वा सूर्यमंडले देवं ध्यायन् ॐ भूताधिपाय विद्महे भवत्पुत्राय धीमहि तन्नो वटुः प्रचोदयात्
इति वटुकभैरवगायत्रीं यथाशक्ति जपित्वा मूलमंत्रं चाष्टोत्तरशतं जप्त्वा जपं समर्प्य स्तुत्वा प्रणा
म्य सूर्यमंडलाद्देवं स्वहृदि विसृज्य श्रीगुरुं प्रणमेदिति त्रिषु कालेषु तांत्रिकसंध्याविधिः त
तः प्रातःसंध्यानंतरं वैदिकतर्पणं निर्वर्त्य स्वगुरुतो वमिति येन मुद्रया जलममृतीकृत्य तत्र
सचक्रं सांगावरणं देवं ध्यात्वा मूलमंत्रमुच्चार्य श्रीभैरवं तर्पयामि नमः इति अष्टोत्तरशतवारं तद

र्धमष्टाविंशतिवारं वा देवस्य मुखकमले परमामृतबुद्ध्या तत्तीर्थजलैः संतर्प्य वरुणदेवताश्च अमुकं त-
र्पयामि नमः इति संतर्प्य देवं स्वहृदि विसृज्य तीर्थं च सूर्ये विसृज्य गुरुदिक्पतिग्रहान् प्रणम्य शु-
द्धोदकपूर्णं पात्रमादाय हृदि स्वेष्टदेवतां स्मरन् मौनी स्वपदमात्रदृष्टिः स्तोत्रादिकं पठन् स्वगृहं गच्छेत्
इति श्रीवत्सकुलकमलप्रद्योतनप्रचंडमार्तंडमहाराजकुमारजैत्रसिंहदेवविरचिते भैरवार्चापारिजा-
ते प्रथमस्तवकः १ ततो द्वारि स्थितः ओं देवत्वं प्रकृतं चित्तं पापाक्रांतमभून्मम तन्निःसारय
चित्तान्मे पापं फट् फट् ते नमः सूर्यः सोमो यमः कालो महाभूतानि पंच च एते शुभाशुभस्येह कर्म-
णो नव साक्षिणः इति पठित्वा हुं फडिति क्रोधदृष्ट्या पार्श्वद्वयमूर्ध्वमधश्चावलोक्य समंता-
द्भूतानुत्सार्य ततः प्रविश्य अंगणे स्थित्वा पादौ प्रक्षाल्याचम्य अंगणभूमौ गोमयमेलोपलिप्तायां सिं-
दूरादिना रचितहृत्मंडलमध्ये स्वासनमास्तीर्य ह्रीं आधारशक्तिकमलासनाय नमः इत्यासनं
संपूज्य ततः प्राङ्मुखो उपविश्य वक्ष्यमाणसूर्यमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मऋषये न-
मः मुखे गायत्रीछंदसे नमः हृदये सूर्यदेवतायै नमः सूर्यार्घ्यदाने विनियोगः इति कृतांजलिर्वा-
देत् अंगुष्ठयोः ह्रां हृदयाय नमः तर्जन्योः ह्रीं शिरसे स्वाहा मध्यमयोः ह्रूं शिखायै वषट् अना-

भै॰पा॰

मिकयोः ह्रैं कवचाय हुं कनिष्ठिकयोः ह्रौं नेत्रत्रयाय वौषट् करतलयोः ह्रः अस्त्राय फट् इति क
रयोर्विन्यस्य पुनः एतानेव मंत्रान् हृदयशिरः कवचनेत्रेषु विन्यस्य ऽस्त्रमंत्रेण तालत्रयं दशा
दिग्बंधनं च कृत्वा रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभ
यवरान् दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रं इति सूर्यं तन्मंडले सांगावरणं ध्या
त्वा स्वपुरतश्चतुरस्रत्रिकोणात्मकं मंडलं कृत्वा श्रीसूर्यार्घ्यपात्रमंडलाय नमः इति मंडलं संपूज्य
तत्र साधारं प्रस्थजलग्राहि ताम्रपात्रं निधाय सूर्यमंत्रेण शुद्धोदकेनापूर्य तिलजवशर्षपपूया
माकतंडुलकुशाग्रगंधाक्षतरक्तपुष्पाणि रक्तचंदनं च निक्षिप्य कुशैराच्छाद्य तत्पात्रं कराभ्यामा
च्छादयन् सूर्यमंत्रमष्टोत्तरशतवारं जपित्वा जानुभ्यामवनिंगतस्तत्पात्रं कराभ्यामामस्तकमुद्धृ
त्य पूर्वोक्तरूपं सूर्यं निष्ठेजं देवताभेदेन ध्यायन् ह्रां ह्रीं सः ग्रहराशिनक्षत्रयोगकरणपरिहृताम
नसंस्थित श्रीसूर्याय एष तेऽर्घ्यः स्वाहा इति सूर्यायार्घ्यं दत्वा सूर्यमंत्रं यथाशक्ति जपित्वा सूर्यं स्तुत्वा
प्रणम्य पूजामंडपद्वारं गत्वा तत्र वक्ष्यमाणविधिना सामान्यार्घ्यं संस्थाप्य तदग्राक्तताम्रादिपात्रस्थ
जलं धेनुमुद्रया ऽमृतीकृत्य तेन जलेन वा पूजामंडपस्य द्वारं प्रोक्ष्य द्वारस्योर्ध्वशाखायां मध्ये ॐ वि

7

लायनमः तद्दक्षिणेमहालक्ष्मैनमः वामेसरस्वत्यैनमः पुनर्मध्येद्वारश्रियैनमः द्वारस्यवामदक्षि
णशाखयोः गणपतयेनमः क्षेत्रपालायनमः शंखनिधिवसुधाराभ्यांनमः पद्मनिधिवसुमती
भ्यांनमः गंगायैनमः यमुनायैनमः धात्रेनमः विधात्रेनमः इतिदेहल्यैक्रमेणसंपूज्य अधःदेहल्यै
नमः तस्याःवामदक्षिणपार्श्वयोः नंदिनेनमः महाकालायनमः इतिद्वारपालौसंपूज्य दक्षिणद्वा
रंगत्वा तद्द्वारेंबुनाभ्युक्ष्य प्राग्वद्विघ्नादिदेहल्यंतप्रोक्तक्रमेणसंपूज्य द्वारपार्श्वयोः गणेश्वरायन
मः वृषभायनमः इतिद्वारपालौसंपूज्य पश्चिमद्वारंगत्वा तथैवाभ्युक्ष्य विघ्नादिदेहल्यंतम
भ्यर्च्य द्वारपार्श्वयोः भृंगिरिटिनेनमः स्कंदायनमः इतिद्वारपालौसंपूज्य उत्तरद्वारंगत्वा तथै
वार्घांबुभिरभ्युक्ष्य विघ्नादिदेहल्यंतमभ्यर्च्य द्वारपार्श्वयोः उमायैनमः चंडेश्वरायनमः इति
द्वारपालौसंपूज्य पुनःपूर्वद्वारंगत्वा अस्त्रमंत्रेणतालत्रयपूर्वकंद्वारमुद्घाट्य पार्ष्णिपातेनकु
ट्टमात्पादाय हूंःवः अस्त्रायफडित्यस्त्रमंत्रेणसप्तधाभिमंत्र्य अपक्रामंतुभूतानिपिशाचाः
प्रेतगुह्यकाः येचात्रनिवसंत्यन्येदेवताभुविसंस्थिताः। अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः
येभूताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया इत्यनेनहूंःवः अस्त्रायफडित्यस्त्रमंत्रंजपन् नाराचमुद्रया

भै॰पा॰
८

मंडपांतः प्रविश्य तस्मान्निर्गच्छतो विघ्नसंघातान् स्वमार्गसंकोचेन मार्गं संदत्वा ह्रः वः अस्त्राय फडिति स्व
मंत्रं स्मरन् वामपार्ष्णिघातत्रयेण भौमान् ऊर्ध्वं तालत्रयेणांतरिक्षगान् तीक्ष्णदृष्ट्यावलोक
नेन दिव्यान् विघ्नानुत्सार्य दक्षिणपादपुरःसरं देहलीमलंघ्य वामशाखाद्वारमाश्रित्य पंचगव्या
र्द्रितोयाभ्यां घंटावादनपूर्वकं मंडपाभ्यंतरं प्रोक्ष्य मंडपस्य नैरृत्यकोणे वास्तुपुरुषाय नमः तत्रै
व वास्त्वधीशाय ब्रह्मणे नमः इति संपूज्य मंडपस्येशानकोणे रक्तवर्णाय रक्तद्वादशशक्तिस
हिताय श्रीदीपनाथाय नमः इति दीपनाथं संपूज्य अतितीक्ष्ण महाकाय कल्पांतदहनो
पम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति भैरवाज्ञां गृहीत्वा अः फट् इति मंडपमध्यस्थां
पूजावेदीं गत्वा तत्रस्थासनस्थानं मूलमंत्रेण वीक्ष्य ह्रः वः अस्त्राय फडिति अस्त्रमंत्रेण प्रोक्ष्य अनेनैव
मंत्रेण कुशैस्त्रिः संताड्य हूं वैं कवचाय हुं इति कवचमंत्रेणाभ्युक्ष्य तत्र चैलाजिनकुशोत्तरं हस्तमा
त्रं चतुरस्रं चतुरंगुलोच्छ्रितं स्वात्मानमासनमास्तीर्य मूलमंत्रेण द्वादशधाभिमंत्रितजलेनाभ्यु
क्ष्य शिरसि मेरुपृष्ठऋषये नमः मुखे सुतलं छंदसे नमः हृदये कूर्माय देवतायै नमः आसने
विनियोगः इति कृतांजलिर्वदेदिति ऋष्यादिकं विन्यस्य पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृ

८

ता तं वधारय मां नित्यं पवित्रं कुरु चासनं इत्यासनमभिमंत्र्य ह्रीं आधारशक्तिकमलासनाय न
मः इत्यासनं संपूज्य तत्र प्राङ्मुखो उदङ्मुखो वा पद्मस्वस्तिकवीरसिद्धान्यतमेनासनेनोपविश्य
आसनस्य स्वदक्षिणाग्रकोणादिचतुष्कोणेषु प्रादक्षिण्येन ओं गं गणपतये नमः ढुं दुर्गायै नमः
सं सरस्वत्यै नमः क्षं क्षेत्रपालाय नमः इति संपूज्य गंधपुष्पाक्षतादीनि पूजाद्रव्याणि स्वदक्षि
णभागे निधाय ह्रां ह्रीं फडिति दिव्यदृष्ट्यावलोक्य कर्पूरादिसुवासितं शुद्धोदकपूर्णं वाम
भागस्थं कुंभं आः इति वामपाणिना स्पृशन् दक्षिणकरांगुल्यग्रेण ऽऽ द्रौं इति कुंभस्थं जले
संस्पृश्य परं इति दीपशिखां स्पृष्ट्वा करं प्रक्षाल्य कृतांजलिर्वामे गुरुभ्यो नमः दक्षिणे गणपतये
नमः अग्रे वटुकभैरवाय नमः इति प्रणम्य चंदनसुगंधपुष्पाणि हूं वः अस्त्रमंत्रेण मर्दयित्वा
करौ सुरभीकृत्य तत्पुष्पं वामकरेण स्वमूर्द्धानं परितो भ्रामयित्वा घ्राय ओं ते सर्वे विलयं यांतु ये
मां हिंसंति हिंसकाः मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके इति पठित्वा हूं वः अस्त्राय फ
डित्यस्त्रमंत्रेण नाराचमुद्रया ऐशान्यां दिशि दूरे प्रक्षिप्य हूं वः अस्त्राय फडित्यस्त्रमंत्रेण पुनः करा
वन्योन्यमार्जनेन संघर्षणे ध्यानेनैवास्त्रमंत्रेणोर्द्ध्वोर्ध्वतालत्रयं मेरुपृष्ठतर्जन्यपशब्देन दशदिग्बंधं यते

भै. पा.
९

वहृत्वा हृः वः अस्त्राय फडित्यस्त्रमंत्रेण त्रिस्फालमुद्रामुद्रितो व्यक्त्वहस्तो मणिवंधेनान्योन्यसंहृत्तौ
करौ स्वमूर्द्धानं परितः प्रादक्षिण्येन त्रिर्भ्रामयित्वा नऽग्निप्राकारत्रयं विधाय तन्मध्यगतमात्मा
नं संचिंत्य वक्ष्यमाणविधिना मूलमंत्रेण प्राणायामत्रयं कृत्वा भूतशुद्धिं कुर्यात् पादादिजानुप
र्यंते पृथ्वीस्थाने चतुरस्रं वज्रलांछितं पीतवर्णं ब्रह्मदैवतं निवृत्तिकलाधिष्ठितं लं बीजयुक्तं ध्या
त्वा जान्वादिनाभिपर्यंते अपां स्थाने अर्द्धचंद्राकारं शुक्लवर्णंयद्वयेपिपद्मलांछितं विष्णुदैवतं
प्रतिष्ठाकलाधिष्ठितं वं बीजयुक्तं ध्यात्वा नाभ्यादिकंठपर्यंते वह्निस्थाने स्वस्तिकोपेतं त्रिको
णाकारं रक्तवर्णं रुद्रदैवतं विद्याकलाधिष्ठितं रं बीजयुक्तं ध्यात्वा कंठादिभ्रूमध्यपर्यंते वायु
स्थाने षट्कोणाकारं षड्बिंदुलांछितं हतवौषट्नेतकृऽस्नवर्णमीश्वरदैवतं शांतिकलाधिष्ठितं यं वी
जयुक्तं विचिंत्य भ्रूमध्यादिब्रह्मरंध्रांतमाकाशस्थाने वृत्ताकारं ध्वजलांछितं धूम्रवर्णं सदाशिव
दैवतं शांत्यतीतकलाधिष्ठितं हं बीजयुक्तं ध्यात्वा तत्र पंचभूतमये देहे धर्मकंदसमुद्भूतं ज्ञान॰
नालकमैश्वर्याष्टदलोपेतं परवैराग्यकर्णिकं स्वहृदयारविंदं विभाव्य तत्कर्णिकायां जीवा
त्मानं मात्राग्रमात्रं प्रदीपकलिकाभास्वरमनादिमलसंछन्नपरविद्रूपं संचिंत्य प्रागुक्तरूपेण मूला

९

९

धाराकुंडलिनीमुत्थाय सुषुम्णावर्त्मनामूलाधाराद्घनाहतांतं तत्रचक्रगाजवर्णं वर्णाधिदेवता
ग्रसंतीहृदयकमलमानीयतयाकवलीकृतंजीवात्मानंध्यायन् सुषुम्णावर्त्मनाविशुद्धादिच
क्रस्यवर्णंवर्णाधिदेवताग्रसंतीब्रह्मरंध्रेनीता तत्रस्थितसहस्रदलकमलकर्णिकामध्यवर्ति
निःपरमात्मज्योतिषिसवर्णवर्णदेवताकदंबकंजीवात्मानंसंयोज्य कुंडलिनींस्वस्थानमानी
यततसंहारंकुर्यात् तत्रपृथ्वीस्थानेघ्राणेंद्रियगमनक्रियागंधवागंधघ्राणपृथ्वीब्रह्मा
निवृत्तिसमानवायून्संस्मृत्य ॐ ह्रांब्रह्मणेपृथिव्याधिपतयेनिवृत्तिकलात्मनेहुं फट् स्वाहा
इतिमंत्रेणतान्सर्वान्कुंडलिनीद्वाराग्रपांमध्येसंहरेत् ततोपांस्थानेहस्तादानेदानवरसरसना
जलविष्णुप्रतिष्ठोदानान्संचिंत्य ॐ ह्रींविष्णवेजलाधिपतयेप्रतिष्ठाकलात्मनेहुं फट् स्वाहा इ
तितान्सर्वान्कुंडलिनीद्वाराब्रह्मतत्वेसंहरेत् ततोवह्निस्थानेपायुविसर्गविसर्जनीयरूपचक्षुर्व
ह्निरुद्रविद्याव्यानान्संस्मृत्य ॐ हुंरुद्रायतेजोधिपतयेविद्याकलात्मनेहुं फट् स्वाहा इतिमंत्रे
णतान्सर्वान्वायुमंडलेसंहरेत् ततोवायुस्थानेउपस्थानंदनद्विषयस्पर्शस्पृष्टत्ववायवीश्व
रशांत्यपानान्संस्मृत्य ॐ ह्रैंईश्वरायवाय्वाधिपतयेशांतिकलात्मनेहुं फट् स्वाहा इतितान्सर्वा

भै॰पा॰
१०

10

नाकाशस्थाने संहरेत् ततश्चाकाशस्थाने वामवदनवक्त्रशब्दश्रोत्राकाशसदाशिवशांत्यतीतः
प्राणान्संसृत्य ॐ ह्रौं सदाशिवायाकाशाधिपतये शांत्यतीतकलात्मने हुं फट् स्वाहा इति तान्स
र्वान्कुंडलिन्यां संहृत्य तान्विंदुशक्तौ विंदुशक्तिं नादशक्तौ नादशक्तिं परशक्तौ प्रणवेन संहृ
त्य ॐ ह्रीं हुं फट् स्वाहा इति तां परशक्तिं पूर्वोक्तपरमात्मनि संयोज्य केवलशरीरे वामकुक्षौ पा
पपुरुषं चिंतयेत् तद्यथा वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कं यस्व
र्णस्तेयभुजद्वयं सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्वं अंगप्रत्यंगपा
तकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्मधरं क्रुद्धं कुक्षौ पापं विचिंतयेत् इ
ति पापपुरुषं संचिंत्य वामनासापुटेन वायुमापूर्य नाभिस्थषट्कोणाकारे वायुमंडले संयो
ज्य तत्र यमिति वायुबीजं कृष्णवर्णं संचिंत्य कुंभकेन यं बीजमावर्तयेत् तदुत्थेन प्रचंडवा
युना स पापपुरुषं स्वदेहं संशोष्य तं वायुं दक्षिणनासया विरेच्य पुनर्दक्षिणनासया वा
युमापूर्य मूलाधारे संयोज्य तत्रस्थवह्निमंडले रमिति वह्निबीजं रक्तवर्णं विचिंत्य कुंभकेन र
मिति बीजमावर्तयंस्तदुत्थितेन महावह्निना स पापपुरुषं स्वदेहे संदह्य पापपुरुषभस्मना

सहतेवायुंवामनासयाविरेच्य पुनर्वामनासयावायुमापूर्य्य ब्रह्मरंध्रेसंयोज्य तत्रस्थितचंद्रमं
डलेवामेत्यमृतवीजंशुक्लवर्णंसंचिंत्य कुंभकेनवंवीजमावर्त्तयेत् ततस्तेनामृतधारयास्वदेहम
स्मसंसिक्तंवायुंदक्षिणनासयावायुमापूर्य्यमूलाधारस्थपार्थिवमंडलेसंयोज्य तत्रलमिति
पृथिवीजंपीतवर्णंसंचिंत्य कुंभकेनलंवीजमावर्त्तयेत् तदुद्भूतेनतेजसामृतप्लावितभस्मघनी
कृत्य तंवायुंवामनासयाविरेच्य पुनर्वामनासयावायुमापूर्य्य मूलाधारस्थविंदुमध्येमाया
वीजंस्फुरद्बालार्कवर्णंसंचिंत्य कुंभकेनमायावीजमावर्त्तयेत् तेनकरचरणाद्यवयवसमेतं
स्वदेहंनिष्पन्नंविभाव्य तंवायुंवामनासयाविरेचयेदिति स्थूलशरीरंनिष्पाद्यसूक्ष्मशरीरंनिष्पा
दयेत् तद्यथा तत्रपूर्वोक्तसहस्रारकमलस्थपरमात्मनः सकाशात्स्वस्थानमानीयततोना
दशक्तिं ततोविंदुशक्तिंप्रणवेनसृष्ट्वा विंदुशक्तेः सकाशात्सकलजगत्सृष्टिहेतुभूतांकुंड
लिनींप्रणवेननिःसार्य्य ततः ॐह्रौंसदाशिवायाकाशाधिपतयेशांत्यतीतकलात्मनेनमः
इतिप्राणेऽ संत्यतीतसदाशिवाकाशश्रोत्रशब्दवाक्यवदनवाणींआकाशस्थानेस्थापयेत् तत
श्चाकाशमंडलात् ॐह्रींईश्वरायवाय्वधिपतयेशांतिकलात्मनेनमः इतिमंत्रेणप्राणशांतीश्व

भै॰पा॰
११

रवायुश्च स्पर्शात्मकस्पर्शोतद्वि षयानंदीपस्यान्वायुस्थाने स्थापयेत् ततो वायुमंडलात् ओँ हूं रुद्रायते
जोधिपतये विद्याकलात्मने नमः इति मंत्रेण व्यानविद्यारुद्रान्तेजश्चक्षूरूपविसर्जनीयसर्गोपायू
नग्निस्थापयेत् ततोग्निमंडलात् ओँ ह्रीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने नमः इति मं
त्रेणोदानप्रतिष्ठाविष्णुर्जलरसनारसदानवादानहस्तानयांस्थाने स्थापयेत् ततो जलमंड
लात् ओँ ह्रां ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने नमः इति मंत्रेण समाननिवृत्तिब्रह्मपृ
थिवी घ्राणगतिवागमनक्रियापादेंद्रियाणि पृथिवीस्थाने स्थापयेत् प्रणवेन कुंडलिनीस्व
स्थाने स्थापयित्वा नादशक्तिं बिंदुशक्तिं परशक्तीनां प्रणवेन स्वदेहव्यापिनीं विभाव्य सोहमिति
मंत्रेण ब्रह्मरंध्रस्य परमात्मनः सकाशात्कुंडलिन्या जीवात्मानं संहृत्य वर्णेवर्णाधिदेवतासहि
तमाज्ञादिचक्रेषु तत्तद्वर्णेवर्णाधिदेवताः स्थापयन् हृदयकमलमानीय हृदयकमले जी
वात्मानं स्थापयित्वा कुंडलिनीं सुषुम्णामार्गेण मणिपूरकादिचक्रेषु तत्तद्वर्णाधिदेवताः
स्थापयन्मूलाधारं नीत्वा तत्रतो स्थापयेत् ततः स्वशरीरं निरस्तसकलकलुषं तेजोमयं
देवनारायणे योगं विभाव्य प्राणप्रतिष्ठां कुर्यात् अथ भूतशुद्धिविहीनेन कृता पूजाभि

११

वारवत् विपरीतफलंदद्यादभक्तायपूजनेयथेति कुंभसंभववचनादावश्यकीयमिति अथ
प्राणप्रतिष्ठामाहयथा शिरसिब्रह्मविष्णुशिवेभ्योऋषिभ्योनमः मुखेऋग्यजुःसामेभ्यः छंदो
भ्योनमः हृदयेपराप्राणशक्त्यैदेवतायैनमः ममप्राणप्रतिष्ठार्थेविनियोगः इतिकृतांज
लिर्वदेत् ततः ॐआंह्रींक्रोंअंकंखंगंघंङंआकाशवाय्वग्निसलिलपृथिव्यात्मनेआंहृद
यायनमः ॐआंह्रींक्रोंइंचं५ शब्दस्पर्शरूपरसगंधात्मनेईंशिरसेस्वाहा ॐआंह्रींक्रोंउंटं५ श्रो
त्रत्वक्जिह्वाघ्राणात्मनेऊंशिखायैवषट् ॐआंह्रींक्रोंएंतं५ वाक्पाणिपादपायूपस्थात्
मनेऐंकवचायहुं ॐआंह्रींक्रोंओंपं५ वचनादानविसर्गगमनानंदात्मनेओंनेत्रत्रयायवौष
ट् ॐआंह्रींक्रोंअंयं१० मनोबुध्यहंकारचित्तात्मनेअः अस्त्रायफट् इतिमंत्रेणांगुष्ठादितलां
तेविन्यस्यहृदयादिषडंगेषुविन्यसेत् ततोध्यानं रक्ताब्धिपोतारुणपद्मसंस्थांपाशांकुशेष्विद्व
रसाशबाणान् शूलंकपालंदधतींकराब्जैः रक्तांत्रिनेत्रांप्रणमामिदेवीं वामाद्यूर्ध्वपराद्यैः त
दाद्यधस्थयोरस्मिन्तदाद्यस्थयोरपरेइत्याद्युपेध्याने इतिध्यात्वा हृदिहस्तंनिधाय ॐआंह्रींक्रों
यंरंलंवंशंषंसंहंसः सोहंममप्राणइहप्राण आमित्यादिममजीवइहस्थितः आमित्यादि॰

ममजीवइहस्थितः आमित्यादिममसर्वेंद्रियाणि आमित्यादिममवाङ्मनः चक्षुःश्रोत्रघ्राणप्राणा
इहागत्यचिरंसुखंतिष्ठंतुस्वाहा ॐ इतिप्राणप्रतिष्ठामंत्रंत्रिर्जप्त्वा निजवपुर्ज्योतिर्मयंध्यायेदि
तिप्राणप्रतिष्ठाविधिः इतिवघेलकुलकमलप्रद्योतप्रचंडमार्तंडमहाराजकुमारश्रीनेत्रसिंह
देवविरचितेश्रीभैरवार्चापारिजातेद्वितीयस्तबकः २ अथमातृकान्यासः तत्रशिरसिब्रह्मणेऋषये
नमः मुखेगायत्रीछंदसेनमः हृदयेश्रीमातृकासरस्वतीदेवतायैनमः गुह्येहल्भ्योबीजायनमः
पादयोःस्वरेभ्यःशक्तिभ्योनमः नाभौक्षकारायकीलकायनमः इतिविन्यस्यमातृकान्यासेविनि
योगइतिकृतांजलिर्वदेत् ततःअंगुष्ठयोः अंकंखंगंघंङंआं हृदयायनमः तर्जन्योःइंचंछंजंझंञंईं शि
रसेस्वाहा मध्यमयोःउंटंठंडंढंणंऊं शिखायैवषट् अनामिकयोः एंतंथंदंधंनंऐं कवचायहुं क
निष्ठिकयोःओंपंफंबंभंमंऔं नेत्रत्रयायवौषट् करतलयोः अंयंरंलंवंशंषंसंहंलंक्षंअः अस्त्राय
फट् इतिकरयोर्विन्यस्यतानेवमंत्रान्हृदयशिरःशिखाकवचनेत्रेषुविन्यस्यास्त्रमंत्रेणतालत्र
येदत्वादशदिग्बंधनंचकृत्वा व्योमेंद्वौरसनागिकर्णिकमयोद्वंद्वौस्फुरत्केसरंपत्रांतर्गतयेव
वर्गीयशलानादित्रिवर्गकमातृ आसांस्वाग्निपुलोतलोगलिपुजादोणोपुरेणाहतंवर्णांजंशिरा

सिस्थितेविषगदप्रग्रंसिमूलंजयेत्‌इतिब्रह्मरंध्रेवर्णैर्बविंदंध्यात्वा मूलाधारेधनिष्क्रान्ताप्रबुद्धाश
क्तिकुंडलि ज्वलत्पावकसंकाशासूक्ष्मतेजस्वरूपिणी मूलाधारास्थिरःपद्मेस्पृशंतीविधकृताकृ
तिः तयासृष्टस्थशिरःपद्मादमृतौघस्वरूपिणी निर्जितान्मातृकावर्णान्सुषुम्णावर्त्मनातेनु वा
पयित्वास्थितान्सर्वानेवंध्यात्वाप्रविन्यसेत् इतिसूक्ष्मरूपावर्णान्नेत्वेध्यात्वा कंठेविशुद्धिचक्रेषोड
शादलकमलमूर्द्धमुखंध्यात्वा तद्दलेषुपूर्वादिप्रादक्षिण्येन ॐ अंनमः ॐ आंनमः ॐ इंनमः
ॐ ईंनमः ॐ उंनमः ॐ ऊंनमः ॐ ऋंनमः ॐ ॠंनमः ॐ लृंनमः ॐ लॄंनमः ॐ एंनमः ॐ ऐंनमः
ॐ ओंनमः ॐ औंनमः ॐ अःनमः इतिविन्यस्य हृदयेअनाहतचक्रेद्वादशदलकमलेध्यात्वा त
द्दलेषुपूर्वादिप्रादक्षिण्येन ॐ कंनमः ॐ खंनमः ॐ गंनमः घंनमः ङंनमः चंनमः छंनमः
जंनमः झंनमः ञंनमः टंनमः ठंनमः ततोनाभिमंडलेदशदलकमलेमणिपूरकचक्रेप्रा
ग्वध्यात्वातद्दलेषुपूर्वादिप्रादक्षिण्येन डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः धं
नमः नंनमः पंनमः फंनमः इतिविन्यस्यलिंगमूलेस्वाधिष्ठानसंचक्रेषट्दलकमलेध्यात्वा
तद्दलेषुप्रादक्षिण्येन ॐ बंनमः भंनमः मंनमः यंनमः रंनमः लंनमः ततोमूलाधारचक्रेचत

भै॰पा॰
१२

दलकमले गुदे मेढ्रान्तरे ध्यात्वा तद्दलेषु प्रादक्षिण्येन ॐ वं नमः शं नमः षं नमः सं नमः त
तो भ्रूमध्ये आज्ञाचक्रे द्विदलकमले ध्यात्वा तद्दलयोः ॐ हं नमः क्षं नमः इत्यंतमातृकां विन्य
स्य बहिर्मातृकान्यासं कुर्यात् ततो ध्याने पंचाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षो
देशां भास्वत्कपर्दां कलितशशिकलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंतालिखितवरकरीमक्ष
णां पद्मसंस्थामाकल्पत्तानमुद्रास्तनजघनभरां भारतीं तां नमामि दक्षिणोर्द्धकरयोराचेतदा
ययःकरयोरेते इत्यायुधध्याने इति श्रुवीक्के ब्रह्मरंध्रस्य वर्णशरविंदे मातृकासरस्वतीं ध्यात्वा शि
रसि अं नमः मुखवृत्ते आं नमः दक्षनेत्रे इं नमः वामनेत्रे ईं नमः दक्षकर्णे उं नमः वामकर्णे ऊं न
मः दक्षिणनासिके ऋं नमः वामनासिके ॠं नमः दक्षगंडे लृं नमः वामे लॄं नमः ऊर्द्ध्वोष्ठे एं नमः अध
रे ऐं नमः ऊर्द्ध्वदंते ओं नमः अधोदंते औं नमः तालुके अं नमः जिह्वाग्रे अः नमः दक्षबाहुमूले
कं नमः मध्ये खं नमः मणिबंधे गं नमः अंगुलिमूले घं नमः अंगुल्यग्रे ङं नमः वामबाहु
मूले चं नमः मध्ये छं नमः मणिबंधे जं नमः अंगुलीमूले झं नमः अंगुल्यग्रे ञं नमः दक्षो
रुमूले टं नमः जानुनी ठं नमः गुल्फे डं नमः अंगुलिमूले ढं नमः अंगुल्यग्रे णं नमः वामोरुमूले

13

१२

तें नमः जानुनी थं नमः गुल्फे दं नमः अंगुलिमूले धं नमः अंगुल्यग्रे नं नमः दक्षिणपार्श्वे पं नमः वामे॰
फं नमः पृष्ठे बं नमः नाभौ भं नमः जठरे मं नमः हृदये यं नमः दक्षांशे रं नमः ककुदि लं नमः वामांशे
वं नमः हृदयादि दक्षिणकराग्रपर्यंते शं नमः हृदयादि वामकराग्रपर्यंते षं नमः हृदयादि दक्षपादपर्यं-
ते सं नमः हृदयादि वामपादपर्यंते हं नमः हृदयादि नाभ्यंते लं नमः हृदयादि मूर्द्धांते क्षं नमः इति केव-
लमातृकान्यासः अथ केवले यथा बिंदुयुक्तं वे अक्षराणां बीजयोगजनार्थमिति संप्रदायः अथ बिंदुमा-
तृकान्यासः तत्र ऋष्यादिकरषडंगन्यासास्तु प्राग्युक्ता एवं ध्यानं तु अक्षस्रजं हरिणपोतमुदग्रटंकं विद्या-
करैरविरतं दधतीं त्रिनेत्रां अर्द्धेन्दुमौलिमरुणामरविंदवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां दक्षा-
धः करयोरधेतदाद्यूर्द्ध्वयोरंते इति वर्णारविंदे ध्यात्वा मूर्धादिहृदयांतं क्षं नमः वामपादाग्रादिहृ-
दयांतं हं नमः दक्षिणपादाग्रादिहृदयांतं सं नमः इत्यादि शिरसि अं नमः इत्यंतं संहारक्रमेण यस्य व-
र्णस्य यत्स्थानं तत्र तत्र दक्षरं न्यसेत् अथ विसर्गमातृकान्यासः तत्र ऋष्यादिध्यानांतं केवलमातृ-
कान्यासोक्तमेव अः नमः आः नमः इत्यादि विसर्गांतान्वर्णान्केवलमातृकान्यासस्थानेषु वऽ
न्यसेत् इति विसर्गमातृकान्यासः अथ बिंदुविसर्गयुक्तस्थितिमातृकान्यासः तत्र ऋष्यादिक

भै.पा.
१९

14

रषडंगन्यासास्तु केवलमातृकान्यासवत् ध्याने सिंदूरकांतममितामरणां त्रिनेत्रां विद्यादक्षसूत्रमृगपोतवरं द
याने पार्श्वस्थितां भगवतीमपि कांचनाभां ध्यायेत्कराब्जधृतपुस्तकवर्णमालां वामाद्ययोः करयोरा
द्येन तदा ऊर्ध्वयोरंसो देव्यास्तु वामदक्षिणकरयोः पुस्तकवर्णमाले इति वर्णारविंदे ध्याता दक्षिणगुल्फे
डं नमः अंगुलीमूले ढं नमः अंगुल्यग्रे णं नमः मुखवृत्ते आं नमः इत्यादि दक्षिणजानुनि ठं नमः
इत्यंते विंदुविसर्गयुक्तान्वर्णान् केवलमातृकान्यासस्थानेष्वेव न्यसेत् इति स्थितिमातृकान्यासः अ
थ तारोस्थिकयैवात्र कलामातृकान्यासः तत्र शिरसि प्रजापतये ऋषये नमः मुखे गायत्रीछंदसे नमः
हृदये कलारूपिणीमातृकासरस्वतीदेवतायै नमः न्यासे विनियोगः इति कृतांजलिर्वदेत् अंगु
ष्ठयोः अं ऊं आं हृदयाय नमः तर्जन्योः इं ऊं ईं शिरसे स्वाहा मध्यमयोः उं ऊं ऊं शिखायै वषट् एं ऐं ऐं
कवचाय हुं अं ॐ औं नेत्रत्रयाय वौषट् अं ॐ अः अस्त्राय फट् इति करांगन्यासः ततो ध्याने हस्तैः
पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शुभ्रं कपालं दरममृतलसद्धेमकुंभं वहंती मु
क्ताविद्युत्पयोद ऽऽ स्फटिकनकजपावंधुकैः पंचवक्त्रैः त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शा
रदां तां नमामि वामाद्ययोः करयोराद्येन तदा ऊर्ध्वयोरन्येन तदा ऊर्ध्वयोरिन्नरेन तदा ऊर्ध्वयोरित्याद्युपध्याने

१९

इति वर्णास्विंदुध्यात्वा विन्यसेत् तद्यथा ॐ अं निवृत्त्यै नमः ॐ आं प्रतिष्ठायै नमः ॐ इं विद्यायै नमः ॐ ईं
शान्त्यै नमः ॐ उं इन्धिकायै नमः ॐ ऊं दीपिकायै नमः ॐ ऋं रेचकायै नमः ॐ ॠं मोचकायै नमः ॐ ऌं
परायै नमः ॐ ॡं सूक्ष्मायै नमः ॐ एं सूक्ष्मामृतायै नमः ॐ ऐं ज्ञानामृतायै नमः ॐ ओं आप्यायिन्यै
नमः ॐ औं व्यापिन्यै नमः ॐ अं व्योमरूपिण्यै नमः ॐ अः अनन्तायै नमः ॐ कं सृष्ट्यै नमः ॐ खं ऋ
द्ध्यै नमः गं स्मृत्यै॰ घं मेधायै॰ ङं कान्त्यै नमः चं लक्ष्म्यै॰ छं द्युत्यै॰ जं स्थिरायै॰ झं स्थित्यै॰ ञं सिद्ध्यै
टं जरायै॰ ठं पालिन्यै॰ डं शान्त्यै॰ ढं ऐश्वर्यायै नमः णं रत्यै॰ तं कामिकायै॰ थं वरदायै॰ दं ह्लादि
न्यै॰ धं प्रीत्यै॰ नं दीर्घायै॰ पं तीक्ष्णायै॰ फं रौद्र्यै॰ बं भयायै॰ भं निद्रायै॰ मं तन्द्रायै॰ यं क्षुधायै॰ रं क्रो
धिन्यै॰ लं क्रियायै॰ वं उल्कायै॰ शं मृत्युरूपायै॰ षं पीतायै॰ सं श्वेतायै॰ हं अरुणायै॰ ळं असिता
यै॰ क्षं अनन्तायै॰ शुद्धमातृकास्थानेषु न्यसेत् इति कलामातृकान्यासः अत्र नादात्मनः सदा
शिवात्संभूताः स्वरकलाः श्वेताः अक्षस्रक्पुस्तककङ्कपालकरा ध्येयाः कचवर्गकलाश्चकाराद्ब्रह्म
णोद्भूताः पीताः अक्षस्रक्पङ्कजाभयकमण्डलुकरा ध्येयाः टतवर्गजाः उकाराद्विष्णोरुत्पन्नाः श्या
मा अभयशङ्खचक्रवरहस्ता ध्येया पयवर्गजाः मकाराद्रुद्रादुत्पन्नाः शरदिन्दुनिभाः अभयपा

भै.पा.
१५

15

लकपालवरहस्ताध्येया षादिपंचवर्णोजाईश्वराहिंदोहन्यन्नारक्ताअभयहरिणटंकवरहस्ता
ध्येया इतिनारोस्याकलामातृकान्यासः अथकेशवादिमातृकान्यासः तत्र साध्यनारायणऋ
षिः गायत्रीछंदः श्रीलक्ष्मीनारायणोदेवतान्यासेविनियोगः इतिऋष्यादिकंस्मृत्वा मूर्द्धादि
षुप्राग्वद्व्यस्तयोनमोंतेनविन्यस्य अंकंखंगंघंङं आंह्लांहृदयायनमः इंचंछंजंझंञंईह्लींसिरसे
स्वाहा उंटंठंडंढंणंऊंह्लूंशिखायैवषट् एंतंथंदंधंनंऐंह्लैंकवचायहुं ओंपंफंबंभंमंऔंह्लौंनेत्र
त्रयायवौषट् अंयंरंलंवंशंषंसंहंलंक्षंअःअस्त्रायफट् इतिमंत्रैः प्राग्वत्करषडंगन्यासंकृत्वा विद्या
रविंदमकरोमृतकुंभपद्मकौमोदकीदरसुदर्शनऽऽ शोभिहस्तं सौदामिनीसदृक्कांतिविभाति
लक्ष्मीनारायणात्मकमखंडितमात्ममूर्त्तेः वपुरितिशेषः वामाक्षयःकरयोराद्येतदाद्यूर्ध्वयोरन्येत
दाद्यूर्ध्वयोरपरेतदाद्ययोरितरेइतिध्यात्वाऽ ह्लींअंकेशवायकीर्त्यैनमः ह्लींआंनारायणकीर्त्यैन
मः ह्लींइंमाधवायतुष्ट्यैनमः ह्लींईंगोविंदायपुष्ट्यैनमः उंविष्णवेधृत्यै· ऊंमधुसूदनायशांत्यै·
ऋंत्रिविक्रमायक्रियायैनमः ॠंवामनायदयायै· लृंश्रीधरायमेधायै· ॡंहृषीकेशायहर्षायै·
एंपद्मनाभायश्रद्धायै· ऐंदामोदरायलज्जायै· ओंवासुदेवायलक्ष्म्यै· औंसंकर्षणायसरस्वत्यै अंप्रद्युम्ना

१५

पप्रीत्यै॰ अं॰ अनिरुद्धायरत्यै॰ कं चक्रिणेजयायै॰ खं गदिनेदुर्गायै॰ गं शार्ङ्गिणेप्रभायै॰ घं खड्गिने
सत्यायै॰ ङं शंखिनेचण्डायै॰ चं हलिनेवाण्यै॰ छं मुशलिनेविलासिन्यै॰ जं शूलिनेविजयायै झं पा
शिनेविरजायै॰ ञं अंकुशिनेविश्वायैनमः टं मुकुन्दायविनदायै॰ ठं नन्दजायसुनन्दायै॰ डं नन्दिनेस्मृ
त्यै॰ ढं नारायणायऋद्ध्यै॰ णं नरकजितेसमृद्ध्यै॰ तं हरयेशुद्ध्यै॰ थं कृष्णायभुक्त्यै॰ दं सत्यायबु
द्ध्यै॰ धं सात्वतायमत्यै॰ नं शौरयेक्षमायै॰ पं शूरायरमायै॰ फं जनार्दनायउमायै बं भूधरायक्ले
दिन्यै॰ भं विश्वमूर्तयेक्लिन्नायै मं वैकुण्ठायवसुदायैनमः यं त्वगात्मनेपुरुषोत्तमायवसुधायै॰
रं असृगात्मनेबलिनेपरायै॰ लं मांसात्मनेबलानुजायपरायणायै॰ वं मेदात्मनेबालायसूक्ष्मा
यै॰ शं अस्थ्यात्मनेवृषघ्नायसंध्यायै॰ षं मज्जात्मनेवृषायप्रज्ञायै॰ सं शुक्रात्मनेहंसायप्रभायै॰ हं प्रा
णात्मनेवराहायनिशायै॰ ळं जीवात्मनेविमलायअमोघायै॰ क्षं परमात्मनेनृसिंहायविद्युतायै॰
१८ इत्येकपंचाशन्मूर्तिशक्तिः केवलमातृकान्यासस्थानेषुन्यसेत् केशवाद्याइमेश्यामाश्चक्रशंखा
ब्जलसत्कराः शक्तयस्तुप्रियांकेषुनिषण्णाः सस्मिताननाः विद्युद्दामसमानांगाः पंकजा
भयवाहवः इतिध्येयाः इतिकेशवादिमातृकान्यासः अथश्रीकण्ठादिमातृकान्यासः तत्रदक्षि

भै॰मा॰
१८

ए॰मस्य न्निरूषि र्गायत्रीछंदः श्रीअर्द्धनारीश्वरोदेवता न्यासे विनियोगः इतिरूष्यादिकं सत्त्वावि-
न्यस्य षडंगन्यासं कुर्यात् तद्यथा अंकं खंगंघंङं आं हृदयाय नमः इं चंछंजंझंञं ईं शिरसे स्वा
हा उं टंठंडंढंणं ऊं शिखायै वषट् एं तंथंदंधंनं ऐं हुं कवचाय हुं ओं पंफंबंभंमं औं ह्रौं नेत्रत्रया
य वौषट् अं यंरंलंवंशंषंसंहंलंक्षं अः ह्रः अस्त्राय फट् इति षडंगमंत्रान् अंगुष्ठादितलांतं विन्यस्य
हृदयादिषु षडंगेषु विन्यसेत् ततोध्यानं बंधूककांचननिभं रुचिराक्षमालां पाशांकुशौ च व
रदं निजबाहुदंडैः बिभ्राणमिंदुशकलाभरणं त्रिनेत्रमर्द्धांबिकेशमनिशं वपुराश्रयामः
दत्ताधः करमारभ्य वामाधः करपर्यंतं मातृषु ध्यानं इति ध्यात्वा न्यसेत् तद्यथा ह्सौं अं श्रीकंठे
शाय पूर्णोदर्यै नमः ह्सौं आं अनंतेशाय विरजायै ह्सौं इं सूक्ष्मेशाय शाल्मल्यै ह्सौं मातृका
दौ सर्वत्र योजनीयं ईं त्रिमूर्तीशाय लोलाक्ष्यै उं अमरेश्वराय वर्तुलाक्ष्यै ऊं अर्घीशाय दीर्घा
घोणायै ऋं भारभूतीशाय दीर्घमुख्यै ॠं स्थाण्वीशाय दीर्घजिह्वायै लृं हरेशाय कुंडोद
र्यै ॡं झिंटीशायोर्द्ध्वकेश्यै एं भौतिकेशाय विकृतमुख्यै ऐं सद्योजातेशाय ज्वालामुख्यै
ओं अनुग्रहेशायोल्कामुख्यै औं अक्रूरेशाय श्रीमुख्यै अः महासेनेशाय विद्यामुख्यै कं क्रो

16

का

घीशाय महाकाल्यै खं चंडेशाय सरस्वत्यै गं पंचांतकेशाय सर्वसिद्धिगौर्यै घं शिवोत्तमेशा
य त्रैलोक्यविद्यायै ङं एकरुद्रेशाय शक्त्यै चं कूर्मेशायात्मशक्त्यै छं एकनेत्रेशाय भूतमात्रे
जं चतुराननेशाय लंबोदर्यै झं अजेशाय द्राविण्यै ञं सर्वेशाय खेनागर्यै टं सोमेशाय खे
चर्यै ठं लांगलीशाय मंजर्यै डं दारुकेशाय रूपिण्यै ढं अर्द्धनारीश्वराय वीरिण्यै णं उमा
कांतेशाय कोदर्यै तं आषाढीशाय पूतनायै थं दंडीशाय भद्रकाल्यै दं अत्रीशाय योगिन्यै
धं मीनेशाय शंखिन्यै नं मेषेशाय गर्जिन्यै पं लोहितेशाय कालरात्र्यै फं शिखीशाय कु
ब्जिन्यै बं छगलंडेशाय कपर्दिन्यै भं द्विरंडेशाय कवर्दिन्यै मं महाकालेशाय जयायै यं त्व
गात्मने वालीशाय सुमुख्यै रं असृगात्मने भुजंगेशाय रेवत्यै लं मांसात्मने पिनाकीशाय मा
धव्यै वं मेदात्मने खड्गीशाय वारुण्यै शं अस्थ्यात्मने केशावाय वायव्यै षं मज्जात्मने श्वेतेशा
य रक्षोविदारिण्यै सं शुक्रात्मने भृगवीशाय सहजायै हं प्राणात्मने नकुलीशाय महाल
क्ष्म्यै लं शक्त्यात्मने शिवेशाय व्यापिन्यै क्षं परमात्मने संवर्तेशाय महामायायै इति केवल
मातृकास्थाने पुन्यसेत अत्र रुद्रसहिता वर्णाः शूलकपालकाः शाक्तयोरुद्रपीठस्याः सिंह

भै॰ पा॰
८

रारुणविग्रहाः रक्तोत्पलकपालाभ्यामलंकृतकरांबुजा इति शाकिनीध्याने इति श्रीकंठादि
न्यासः अथ भुवनेश्वरीमातृकान्यासः तत्र शक्तिऋषिर्गायत्रीछंदः श्रीमातृकामयीभुव
नेश्वरीदेवतान्यासे विनियोगः इति ऋष्यादिकं स्मृत्वा ह्रीं दिक्षु [illegible] मेनेन विन्यस्य अं
कं खं गं घं ङं आं ह्रां हृदयाय नमः इं चं छं जं झं ञं ईं ह्रीं शिरसे स्वाहा उं टं ठं डं ढं णं ऊं ह्रूं शिखा
यै वषट् एं तं थं दं धं नं ऐं कवचाय हुं ओं पं फं बं भं मं औं ह्रौं नेत्रत्रयाय [illegible] वौषट् अं यं रं लं वं शं
षं सं हं लं क्षं अः ह्रः अस्त्राय फट् इति षडंगमंत्रैः करषडंगन्यासं विधाय ध्यायेत् उद्यत्कोटिदि
वाकरप्रतिभटां तुंगोरुपीनस्तनीं वक्त्रकुंडकिरीटहाररसनामंजीरसंशोभितां दद्याः कर
मारभ्य वामाधः करपर्यंतमायुधध्याने इति वर्णारविंदे ध्यात्वा ह्रीं अं नमः ह्रीं इं नमः इत्यादि
ह्रीं लं नमः इत्यंते केवलमातृस्थानेष्वेव न्यसेत् अथ श्रीबीजादिमातृकान्यासः तत्र भृगुऋषिः गा
यत्रीछंदः मातृकारूपिणी लक्ष्मीर्देवता न्यासे विनियोगः इति ऋष्यादिकं स्मृत्वा प्रागुक्त
विधिना विन्यस्य अं कं खं गं घं ङं आं श्रां हृदयाय नमः इं चं छं जं झं ञं ईं श्रीं शिरसे स्वाहा उं टं ठं डं
ढं णं ऊं श्रूं शिखायै वषट् एं तं थं दं धं नं ऐं श्रैं कवचाय हुं ओं पं फं बं भं मं औं श्रौं नेत्रत्रयाय वौषट् अं यं

१०

रेंलंवंशंषंसंहंलंक्षंअः अः अस्त्रायफट् इतिषडंगमंत्रः करषडंगन्यासान्विधाय ध्यानं विद्युद्दामसम
प्रभांहिमगिरिप्रख्यैश्चतुर्भिर्गजैः शुंडादंडसमुद्धृतामृतघटैरासिच्यमानामिमां विभ्राणांकरपंक
जैर्जपवटीपद्मद्वयेपुस्तकंभास्वद्रत्नसमुज्ज्वलांकुचनतांध्यायेजगत्स्वामिनी दक्षाधःकरमारभ्य
वामाधःकरपर्यंतंआयुधध्यानं इतिवर्णारविंदे ध्यात्वा श्रींअंनमः श्रींआंनमः इत्यादिमातृका
न्यासस्थानेषुन्यसेत् इतिश्रीवीजादिमातृकान्यासः अथकामवीजादिमातृकान्यासः तत्रसंमोह
नऋषिः गायत्रीछंदः मातृकामयीसंमोहनीदेवतान्यासेविनियोगः इतिऋष्यादिकंस्मृत्वा
विन्यस्य प्रागुक्तविधिनाह्रस्वदीर्घस्वरसंपुटितषडंगैः षड्दीर्घयुक्तकामवीजान्वितैः करषडंग
न्यासंविधाय ध्यानं बालार्ककोटिरुचिरांस्फटिकाक्षमालांकोदंडमिक्षुजनितंस्मरपंचबाणा
न् विभ्राणांवहस्तकमलैर्दधतीत्रिनेत्रांध्यायेत्समस्तजननीनवचंद्रचूडां वामाधऊर्ध्वकरयोः
पुस्तककोदंडे दक्षोर्ध्वयोः पंचबाणाक्षमालेइत्यायुधध्यानं इतिवर्णारविंदे ध्यात्वा
क्लींअंनमः क्लींआंनमः इत्यादिमातृकास्थानेषुन्यसेत् इतिकामवीजादिमातृकान्या
सः अथशक्तिश्रीकामवीजादिमातृकान्यासः तत्रमहासंमोहनऋषिः गायत्रीछंदः मातृ

कामयी महासंमोहनी देवता न्यासे विनियोगः इति ऋष्यादिकं ऽऽ सृत्वा प्राग्वद्विन्यस्य अंकं खं
गं घं ङं । ओं ह्रीं श्रीं क्लीं हृदयाय नमः इं चं छं जं झं ञं ईं ह्रीं श्रीं क्लीं शिरसे स्वाहा उं टं ठं डं ढं णं ऊं ह्रूं क्लूं
शिखायै वषट् एं तं थं दं धं नं ऐं ह्रैं क्लैं कवचाय हुं ओं पं फं बं भं मं औं ह्रौं क्लौं नेत्रत्रयाय वौषट् अं यं रं लं
वं शं षं सं हं लं क्षं अः ह्रः श्रः क्लः अस्त्राय फट् इति षडंगमंत्रैः करषडंगन्यासं विधाय ध्यायेयम
द्वलये त्वशरासपाशायग्रहयंकुशशरान्नवपुस्तकं च ओं विभ्रंती निजकरैररुणांकुचार्ता
संमोहनी त्रिनयना नवचंद्रचूडां वामा यः करमारभ्य दक्षि ऽ णाधः करपर्यंतमायुधध्यानं अत्रा
द्वलयपुस्तकयोर्मध्ययोर्वीक्ष्यः इति वर्णारविंदे ध्यात्वा ह्रीं श्रीं क्लीं अं नमः ह्रीं श्रीं क्लीं आं नमः इ
त्यादि मातृकान्यासस्थानेषु न्यसेत् इति त्रिबीजादिमातृकान्यासः इति श्रीवघेलकुलकमलप्रबो
त प्रचंडमार्तंड श्रीमहाराजकुमारश्रीजित्रसिंहदेवविरचिते श्रीभैरवार्चापारिजाते तृतीयस्तवकः
अथ प्रपंचयागमातृकान्यासः तत्र महाऽगणपतिमंत्रेणैव दसमाणेन प्राणायामत्रयं कृत्वा तस्य मं
त्रस्य शिरसि गणकऋषये नमः मुखे निचृद्गायत्रीछंदसे नमः हृदये श्रीमहागणपतिर्देवतायै
नमः गुह्ये गंबीजाय नमः पादयोः स्वाहाशक्तये नमः मम प्रपंचयागांगत्वेन जपे विनियोगः इति ऋष्या

18

दिन्यासंविधाय अंगुष्ठयोः ॐगांहृदयानमः तर्जन्योः श्रींगींशिरसेस्वाहा मध्यमयोः ह्रींगूं
शिखायैवषट् अनामिकयोः क्लींगैंकवचायहुं कनिष्ठिकयोः ग्लौंगौंनेत्रत्रयायवौषट्
करतलकरपृष्ठयोः गंगः अस्त्रायफट् इतिषडंगमंत्रानंगुष्ठादितलांतेकरयोर्विन्यस्य हृ
दयाशिरशिखाकवचनेत्रेषुचषड्विन्यस्यास्त्रमंत्रेणतालत्रयंकृत्वा तर्जन्यंगुष्ठशब्देर्दशादिग्बं
धनेचविधाय ध्याने हस्तींद्राननमिंदुचूडमरुणच्छायंत्रिनेत्रंरसादाश्लिष्टप्रियया सपद्म
करयास्वांकस्थयासंततं बीजापूरगदाधनुर्द्विशिखयुक्चक्राब्जपाशोत्पलव्रीह्यग्रस्वविषा
णरत्नकलशान्हस्तैर्वहंतंभजे गंडभित्तिगलद्दानपूरलालसमानसान् द्विरेफान्कर्णताला
लास्फोटवारयंतंमुहुर्मुहुः कराग्रधृतमाणिक्यकुंभवक्त्रविनिःसृतैः रत्नवर्षैः प्रीणयंतं साधका
न्मदविह्वलं माणिक्यमुकुटोपेतंरत्नाभरणभूषितं भूगपत्नीवितंदेवंरक्तरैश्चमुहुर्मुहुः
वामाधःकरमारभ्यदक्षिणाधःकरपर्यंतंआयुधध्याने रत्नगंडूषंडाग्रेकेचित् अधोवामदक्षि
णयोरायेनशुंडयोरन्ये एवंक्रमेणान्यान्यपिज्ञातव्यानित्याहुः षडक्षगणेश्वरपरामर्शिभ्यां
दक्षाधःकरमारभ्यमायस्यकरांतकं गदाशूलाब्जकह्लारविषाणंदक्षिणेकरैः शालग्रापाश

चक्रं दवचापपाशाहिजपरकं करैर्दधानं मंजीरविलसच्चरणांबुजं लीलयात्तकलशं मुष्करा ग्रेनि-
धापव अत्र यथागुरूपदेशं ध्याने कार्यमिति इति महागणपतिं ध्यात्वा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणप-
तये वरवरद सर्वजनं मे वशमानय स्वाहा इति मंत्रमष्टधा जपित्वा गणपतिबीजस्य गणक ऋषि-
र्निचृद्गायत्री छंदः विघ्नेशो देवता धर्मार्थकाममोक्षार्थे जपे विनियोगः इति ऋष्यादिकं स्मृत्वा विन्यस्य गां
गीं गूं गैं गौं गः इति मंत्रैः करषडंगन्यासं विधाय ध्याने सिंदूराभं त्रिनेत्रं पृथुतरजठरं हस्तप-
द्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं बालेंदुद्योतिमौलिं करिपतिव-
दनं दानपूरार्द्रगंडं भोगींद्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागं वामाधःकरमारभ्य द-
क्षिणाधःकरमारभ्य दक्षिणाधःकरपर्यंतमायुधध्याने इति ध्यात्वा गमिति गणपतिबीजं
चत्वारिंशद्वारं जपित्वा ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे
निधीनां त्वा निधिपतिं हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधं
इति गणपत्यं वैदिकमंत्रमेकवारं जपित्वा ह्रीं क्रों ह्रीं गं नमः सर्वविघ्नाधिपाय सर्वार्थसिद्धि-
दाय सर्वदुःखप्रशमनाय एह्येहि भगवन्सर्वान्बाधय त्वं भयत्वं भय ह्रीं गं गां नमः स्वाहा क्रों

भै॰पा॰ १९

१९

ह्रीं इति मालामंत्रं चतुराहुतिं जपित्वा ततः पूर्वोक्तां शुद्धमातृकां ऋष्यादिकरषडंगन्यासध्यानपू
र्वकं वाग्देवतायै विन्यस्य मुखवृत्ते अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः आदित्याय नमः दक्षिणबा
हुमूलाद्यग्रांतेषु यं रं लं वं सोमाय नमः वामबाहुमूलाद्यग्रांतेषु कं खं गं घं ङं भौमाय नमः दक्षिणोरु
मूलादिपादाग्रांतेषु चं छं जं झं ञं शुक्राय नमः वामोरुमूलादिपादाग्रांतेषु टं ठं डं ढं णं बुधाय नमः
जठरे तं थं दं धं नं बृहस्पतये नमः हृदये पं फं बं भं मं शनैश्चराय नमः इति ग्रहान्विन्यस्य अथा
वयोगमंत्रस्य ब्रह्मा ऋषिर्गायत्री छंदः सकलपदार्थानुगतपरिपूर्णस्वप्रकाशसच्चिदानंद
परंज्योतिः परमात्मा देवता प्रपंचयोगमातृकान्यासे विनियोगः इति ऋष्यादिकं स्मृत्वा चतुर्थीन
मोंतान्नक्षत्रादिषु ऋष्यादि विन्यस्य ॐ ह्रीं अं कं खं गं घं ङं आं स्वाहा हृदयाय नमः ॐ ह्रीं इं चं छं
जं झं ञं ईं सोहं शिरसे स्वाहा ॐ ह्रीं उं टं ठं डं ढं णं ऊं हंसः शिखायै वषट् ॐ ह्रीं एं तं थं दं धं नं ऐं क्लीं
कवचाय हुं ॐ ह्रीं ओं पं फं बं भं मं औं ॐ नेत्रत्रयाय वौषट् ॐ ह्रीं अं यं रं लं वं शं षं सं हं लं क्षं अः हरि
हरास्त्राय फट् इति षडंगमंत्रैः करषडंगन्यासं कृत्वा ध्यानं तारादिपंचस्तुतिभिः परिवीयमा
नं मौनैरगम्यमनिशं जगदेकमूलं सच्चित्सुखं सकलगामनश्वरमच्युतं तं तेजः परं भजत सांद्रकृपां च

भै॰ पा॰
२०

20

षि॰ इति सकलप्रपंचातिरिक्तः परिपूर्णसच्चिदानंदोऽहमिति स्वात्मानं ध्यात्वा परमात्मवह्नौ तत
त्स्थान पुनस्तान्वर्णान्जुहोमीति विधिना ॐ ह्रीं अं हंसः सोहं स्वाहा ॐ ह्रीं लं हंसः सोहं स्वाहा इत्यादि ॐ
ह्रीं अं हंसः सोहं स्वाहा २ अनंतसंहारक्रमेण विसर्गस्य पुनः ॐ ह्रीं अं हंसः सोहं स्वाहा ॐ ह्रीं अः हंसः सो
हं स्वाहा इत्यादि ॐ ह्रीं लः हंसः सोहं स्वाहा इत्येतान्सविसर्गान्वर्णान्केवलमातृकान्यासस्थानेष्वेवन्य
सेदिति प्रपंचयागन्यासः अथ मूलमंत्रेण प्राणायामत्रयं कृत्वा योगपीठन्यासं कुर्यात् तत्र बद्ध
पद्मासनो ऋजुकायः सम्यगुपविश्य दक्षिणांगुष्ठेन दक्षिणनासापुटं निरुध्य वामनासापुटेन
वायुमाकृष्य सोदरं पूरयित्वा कनिष्ठानामिकाभ्यां वामनासापुटं च निरुध्य हृदि देवं ध्यायन् मू
लमंत्रं जपन्यावच्छक्यं वायुं कुंभकेन धृत्वा पुनर्दक्षिणनासापुटेन शनैः शनैस्तं वायुं त्यजेदेतदेकः प्रा
णायामः पुनर्दक्षिणनासापुटेन वायुमाकृष्य तथैव कुंभयित्वा तथैव दक्षिणनासारंध्रेण तं वायुं त्य
जेदित्यपरः इत्थं प्राणायामत्रयं कृत्वा मूलाधारे मंडूकाय नमः स्वाधिष्ठाने कालाग्निरुद्राय नमः
मणिपूरे मूलप्रकृत्यै नमः हृदये आधारशक्त्यै नमः हृदय एव कूर्माय नमः अनंताय नमः वरा
हाय नमः पृथिव्यै नमः सुधार्णवाय नमः रत्नद्वीपाय नमः स्वर्णपर्वताय नमः नंदनोद्यानाय न

मः कल्पवृक्षेभ्योनमः विचित्ररत्नभूम्यैनमः स्वर्णप्राकारायनमः रत्नमंडपायनमः स्वर्णवेदिका
यै॰ रत्नसिंहासनाय इत्येतत्सर्वंतत्स्थानभावनयाविन्यस्य स्वशरीरमंसद्वयोरुद्वयकल्पितपाद
चतुष्टयमेव नाभिपार्श्वद्वयकल्पितगात्रचतुष्टयंरत्नसिंहासनेध्यात्वा दक्षिणांसेधर्मायनमः
वामांसेज्ञानायनमः वामोरौवैराग्याय दक्षिणोरावैश्वर्याय॰ मुखेऽधर्माय वामपार्श्वेऽज्ञानाय॰
नाभावऽवैराग्याय॰ दक्षिणपार्श्वेऽनैश्वर्याय इतिविन्यस्य पुनःहृदयेमायायै विद्यायै इतिमाया
विद्ये ओतप्रोतरूपेविचिंत्यविन्यस्य तदुपरिसिंहासनमध्ये अनंताय॰ पद्माय॰ आनंदकंदाय
संविन्नालाय प्रकृतिमयपत्रेभ्यो विकारमयकेसरेभ्यो॰ पंचाशद्वर्णबीजाढ्यसर्वतत्त्वस्वरूपायैकर्णि
कायैनमः अंअर्कमंडलाय॰ उंसोममंडलाय॰ मंवह्निमंडलाय॰ संबोधात्मनेसत्त्वाय॰ रंप्रकृत्यात्मने
रजसे॰ तंमोहात्मनेतमसे॰ आंआत्मने॰ अंअंतरात्मने॰ पंपरमात्मने॰ ह्रींज्ञानात्मने सिंहासनस्यचतु
र्दिक्षुमध्येच ज्ञानतत्त्वात्मने मायातत्त्वात्मने कलातत्त्वात्मने॰ परमतत्त्वात्मने॰ इतिविन्यस्य ॐन॰
मोभगवतेसकलगुणात्मशक्तियुक्तायानंताययोगपीठायनमः इतिमूर्द्धादिपादपर्यंतव्यापकंन्य
सेदितियोगपीठन्यासः अथमूलमंत्रन्यासः तत्रप्राग्वत्प्राणायामत्रयंकृत्वा शिरसिहृदारण्य

कश्रृषये नमः मुखे अनुष्टुप्छंदसे हृदये श्रीवटुकभैरवाय देवतायै इति विन्यस्य मम चतुर्विधपुरुषार्थ॰
सिद्धये जपे विनियोगः इति कृतांजलिर्वदेत् ततः अंगुष्ठयोः ह्रौं वौं ईशानाय नमः तर्जन्योः ह्रैं वैं तत्पुरुषा
य नमः मध्यमयोः ह्रुं वुं अघोराय॰ अनामिकयोः ह्रिं विं सद्योजाताय कनिष्ठिकयोः ह्रं वं वामदेवाय॰ ततो
मूलब्रह्मस्य हृदयगुह्यपादेषु प्रोक्तपंचमूर्त्तिं विन्यस्य ब्रह्मरंध्रे ह्रौं वौं ईशानाय ऊर्ध्ववक्त्राय इत्यंगुष्ठे मन्यसेत्
मुखे ह्रैं वैं तत्पुरुषाय प्राग्वक्त्राय नमः इति तर्जन्या दक्षिणकर्णे ह्रुं वुं अघोराय दक्षिणवक्त्राय इति मध्य॰
मया वामकर्णे ह्रिं विं सद्योजातायोत्तरवक्त्राय॰ इत्यनामिकया चूडाधः ह्रं वं वामदेवाय पश्चिमवक्त्राय इति
कनिष्ठिकया इति पंचवक्त्रन्यासं विधाय अंगुष्ठयोः ह्रां वां हृदयाय॰ तर्जन्योः ह्रीं वीं शिरसे स्वाहा मध्य
मयोः ह्रूं वूं शिखायै वषट् अनामिकयोः ह्रैं वैं कवचाय हुं कनिष्ठिकयोः ह्रौं वौं नेत्रत्रयाय वौषट् करतल
करपृष्ठयोः ह्रः वः अस्त्राय फट् हृदये ह्रां वां हृदयाय नमः इत्यंगुष्ठरहिताङ्गुलीभिर्न्यसेत् शिरसि ह्रीं
वीं शिरसे स्वाहा इति प्रागुक्ताभिरेव शिखायां ह्रूं वूं शिखायै वषट् इति कृतमुष्टिकरांगुष्ठेन स्कंधादिना॰
भ्यंते कवचस्थाने ह्रैं वैं कवचाय हुं करद्वयांगुलिभिर्दशभिः नेत्रयोर्ललाटे च ह्रौं वौं नेत्रत्रयाय वौषट् ह्रः
वः तर्जनीमध्यमानामाभिः ह्रः वः अस्त्राय फट् इत्यस्त्रमंत्रेण तालत्रयं तर्जन्यंगुष्ठयोगोत्थशब्दैर्दशदिग्बंध

२२

त्य

नेत्रं कृत्वा देवालये स्फटिकसदृशं कुन्तलोल्लासिवक्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः दी
प्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां वटुकमनिशं शूलदण्डौ दधानं दत्त्वा वामकरयोः शू
लदण्डौ ध्येयं इत्यभेदेन ध्यात्वा स्वशिरसि मूलमन्त्रेण पुष्पाञ्जलिं दत्त्वा पुनः हृदयकमले ध्यात्वा
वक्ष्यमाणयोगपीठपूजापुरस्सरं मानसैः उपचारैः देवं साङ्गं सावरणं संपूज्य मानसमेव नैवेद्यं दत्त्वा
देवं भुञ्जानं ध्यायन् मूलाधारे आत्मान्तरात्मपरमात्मज्ञानात्माकारचतुरस्रकुण्डमध्ये वह्निशक्तिं
कुण्डलिनीवह्निरूपां ध्यात्वा मूलमन्त्रमुच्चार्य अग्र हेतोर्जुहोमि स्वाहा पुनर्मूलं अग्रस्तत्वं जुहोमि स्वा
हा इत्यग्रे अहंकाररूपे शून्यकामक्रोधलोभमोहमदमात्सर्याणि क्रमेण सुषुम्णास्रुचुकमनस्रु
वेण हुत्वा प्राणायामऋष्यादिकरषडङ्गन्यासं कृत्वा मूलमन्त्रमष्टोत्तरशतवारं जपित्वा वक्ष्यमा-
णविधिना जपं समर्प्य श्रीगुरुं प्रणम्य स्वपुरतश्चन्दनादिलिप्तभूतले सिन्दूरादिना अष्टदलकमलं
सकर्णिककेसरं निर्माय तत्कर्णिकायां षट्कोणं तन्मध्ये ऊर्ध्वाग्रत्रिकोणं तदन्तः पुनः सक
र्णिकं सकेशरमष्टदलकमलं सर्वबाह्ये चतुर्द्वारयुक्तं चतुरस्रत्रयं कृत्वा तस्मिन् पूजाचक्रे मूल
मन्त्रेण पुष्पाञ्जलिं दद्यात् केचित्तु देवचक्रमध्यगतत्रिकोणमध्ये वामपंकजशाखेन केवलं ह

नमात्रेवदंति तदज्ञानविजृंभितकेवलहृत्पद्मपंकजशब्दस्य वाच्यत्वाभावात् कर्णिकाकेशरदला
ग्रपत्रिकेषसमेतत्वात्पद्मस्य षट्कोणांतत्रिकोणस्थव्योमपंकजयोर्नामितेश्चेति श्रीनाथचक्रोद्धारप्रकरणे
भिधायावरणपूजाप्रकरणेपि। व्योमपद्मदलेष्ववेदसितांगादिभैरवान्निति भैरवकल्पपूरदाति·
लकयोर्दर्शनाच्चाष्टदलपद्ममेवव्योमपद्ममिति सिद्धांतः अस्य पद्मस्य व्योमपंचकेत्वंतविश्वस्मरण
वचनादिकार्तिकपरब्रह्मात्मकश्रीभैरवनिवासयोग्यत्वात् अथवा स्वर्णादिपट्टे चंदनादिनाष्टगंध
मर्चामंडलंकृत्वा यद्वा स्वर्णस्फटिकादिभिः शिल्पिवरैर्निर्मितं पूजाचक्रं वा चंदनरक्तचंदनश्रीपर्णे
न्यतमकाष्टनिर्मिते पीठे स्वर्णादिरचिते वा सिंहासने संस्थाप्य तत्र प्राग्वत् पुष्पांजलिं निक्षिपेत्
अत्र स्वर्णरजतताम्रादिधातुभिर्निर्मितपूजाचक्रे प्रथमतो वैदिकमंत्रेण स्वस्वशाखोक्तेन ब्राह्मणद्वा
राम्लरसादिना संशुद्धस्य चक्रस्याग्न्युत्तारणादिकं कारयित्वा पंचगव्यैः पंचामृतैश्च प्रक्षाल्य पुनः
शुद्धजलेन धूपवासितेन प्रक्षाल्य चंदनागुरुकर्पूरकस्तूरीकुंकुमादिपंकेनालिप्य पुरतः शु
भे पीठे संस्थाप्य तच्चक्रं स्पृष्ट्वा मूलमंत्रमष्टोत्तरसहस्रं जपित्वा संशुद्धस्य तस्य चक्रस्य प्राणक्र
प्राणप्रतिष्ठामंत्रे मम पदस्थाने श्रीभैरवपूजाचक्रस्येति पदं प्रयोजयन् चक्रं स्पृशन् प्राणप्रतिष्ठामंत्रज

येनप्रागुक्तप्राणशक्तिध्यानपूर्वकंप्राणप्रतिष्ठांकृत्वा तत्रपीठपूजापूर्वकंदेवमावाह्यसांगंसा
वरणंसंपूज्य वक्ष्यमाणवलिदानादिमहानैवेद्यपूर्वकंमहोत्सवंप्रत्यहंदिनत्रयपर्यंतंकुर्या
त् दिनत्रयेऽपिप्रथमदिनेआवाहितंदेवंनविसर्जयेत् चतुर्थदिनेनित्यपूजांतेदेवंविसर्जयेत्
इतिप्रतिष्ठितेचक्रेनित्यनैमित्तिकादिपूजनंकुर्यात् ततःप्रत्यहंतत्रमूलवारिभिःशुद्धजलेनवप्र
क्षालनंचात्मयचक्रस्यस्फाटिकस्यतुकेवलजलेनैवक्षालनंकार्यमिति इत्थंप्रतिष्ठितंप्रक्षालि
तंवेदनादिमंडितंपुरतःप्रोक्तपीठेसंस्थाप्य तत्रमूलमंत्रेणपुष्पांजलिंदत्वा स्वपुरतःकिंचिद्वा
माग्रेचतुरस्रवृत्तत्रिकोणात्मकंमंडलंवेदनानुलिप्तभूतलेमत्स्यमुद्रयाविधाय श्रीभैरवस्यार्घा
धारमंडलायनमः इतिमंडलंसंपूज्य तत्रवायव्यनैरृत्यैशान्याग्नेयकोणेषु ह्रांवांहृदयायनमः ह्रीं
वींशिरसेनमः ह्रूंवूंशिखायैनमः ह्रैंवैंकवचायनमः इतिसंपूज्य पुरतःह्रौंवौंनेत्रायनमः स्वा
ग्रादिचतुर्दिक्षुः ह्रः वः अस्त्रायनमः इतिषडंगानिसंपूज्य तत्रमूलमंत्रेणप्रक्षालितमर्घपा
त्राधारं श्रीभैरवार्घपात्राधारंस्थापयामिति संस्थाप्य मंरंयमंप्रदशकलात्मनेवह्निमंडलाय
श्रीभैरवार्घाधारायनमः इतिसंपूज्य तत्रस्वाग्रादिप्रादक्षिण्येनकुंभाकारेण यंधूम्रार्चिषेनमः

भै॰पा॰
२३

रंरुरुमायैनमः लंज्वलिन्यै॰ वंज्वालिन्यै॰ शंविस्फुलिंगिन्यै॰ षंसुश्रियैनमः सस्सरूपायै॰ हं कपिलायै॰ लंहव्यवाहायै॰ क्षंकव्यवाहायै॰ इतिवह्निकलांसंपूज्य पूर्वोक्तप्राणप्रतिष्ठामंत्रं जपेत्प्राणप्रतिष्ठांविधाय हूंःवःअस्त्रायफडित्यस्त्रमंत्रेणस्वर्णादिनिर्मितंपात्रंप्रक्षाल्य श्रीभैरवार्घपात्रंप्रतिष्ठयामि इतितस्मिन्नाधारेसंस्थाप्य अहंद्वादशकलात्मनेसूर्यमंडलायश्रीभैरवार्घपात्रायनमइति तत्पात्रंसंपूज्य तत्रभूमिस्थमंडलवन्मंडलंविभाव्य तथैवषडंगैःसंपूज्य तत्रहन्नाकारेणप्रादक्षिण्येन कंभंतपिन्यैनमः खंबंतापिन्यै॰ गंफंधूम्रायै॰ घंपंमरीच्यै॰ ङंनंज्वालिन्यै॰ चंधंरुच्यै॰ छंदंसुषुम्णायै॰ जंथंभोगदायै॰ झंतंविश्वायै॰ ञंणंवोधिन्यै॰ टंढंधारिण्यै॰ ठंडंक्षमायै॰ इतिसंपूज्य प्राग्वत्प्राणप्रतिष्ठामंत्रेनपिन्यादीनामितिपदंतियोज्यतासांप्राणप्रतिष्ठांविधाय तं लंहंसंषंशंवंलंरंयंमंभंवंफंपंनंधंदंथंतंणंढंडंठंटंञंझंजंछंचंङंघंगंखंकंअःअंऔंओंऐंएंलॄंलृंॠं ऋंऊंउंईंइंआंअंइत्येतेनमूलमंत्रंजपेत् सुद्धोदकैःश्रीभैरवार्घपात्रंपूरयामितिसंपूर्य ॐ संषोडशकलात्मनेसोममंडलायश्रीभैरवार्घामृतायनमः इतितज्जलंसंपूज्य तत्रप्राग्वत्भूमिस्थमंडलंविभाव्य तथैवषडंगैःसंपूज्य तत्रहन्नाकारेणप्रादक्षिण्येन अंअमृतायैनमः आंमानदायै इंपूषायै॰ ईं

२३

तुष्ट्यै॰ उं पुष्ट्यै॰ ऊं रत्यै॰ ऋं धृत्यै॰ ॠं शशिन्यै॰ लृं चन्द्रिकायै लॄं कान्त्यै॰ एं ज्योत्स्नायै॰ ऐं श्रियै॰ ओं प्रीत्यै॰
औं अंगदायै॰ अं पूर्णायै॰ अः पूर्णामृतायै॰ इति संपूज्य प्राग्वदमृतादिनामितियदं प्राणप्रतिष्ठामंत्रे
योजयन् तासां प्राणप्रतिष्ठां विधाय प्राग्वत्सूर्यमंडलात्स्नानप्रकरणोक्तविधिनातीर्थमावा
ह्य मूलमंत्रेण तद्वज्जले संयोज्य हूं हूं शिखायै वषडिति शिखामंत्रेण गालिनीमुद्रां प्रदर्श्य एवमिति
धेनुमुद्रयामृतीकृत्य तत्र देवं ध्यात्वा ह्रां वां हृदयाय नमः ह्रीं वीं शिरसे स्वाहा हूं वूं शिखायै वष
ट् ह्रैं वैं कवचाय हुं ह्रौं वौं नेत्रत्रयाय वौषट् ह्रः वः अस्त्राय फट् इति षडंगमंत्रान्देवस्य देहे हृदयादि
षु विन्यस्य धेनुमुद्रया तन्मात्रमवगुण्ठ्य योनिमुद्रया तज्जलं स्पृशन् तेजोमयभावनया तज्जलमुद्दी
प्य मूलमंत्रेण गंधादिभिः संपूज्य प्राग्वत्षडंगानि च वक्तरस्वे संपूज्य मूलमंत्रेणाष्टवारमभिमंत्र्य
तः पश्चिमद्वारे उदुंबरमयं तोरणं प्राग्वन्निर्मितं अग्न आयाहि वीतये गृणानो हव्यदातये नि होता
सत्सि बर्हिषि इति मंत्रेण न्यसेत् तत उत्तरद्वारे वट वृक्षमयं तोरणं प्राग्वन्निर्मितं शन्नो देवीरभिष्टये
आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः इति मंत्रेण न्यसेत् अथवा पूर्वद्वारे अश्वत्थमयं दक्षिणे औ
दुंबरं पश्चिमे प्लक्षजं उत्तरे न्यग्रोधजमिति तोरणचतुष्टय मङ्गललक्षणमुक्तविधिनैव स्थाप
येत् ततस्तेषामुपरि तन्तिर्यक्‌फलकेषु मध्यतः सशिरविधायतेषु तोरणसजातीयकाष्ठेन नि
र्मितं हस्तमात्रदैर्घ्यं शैवे त्रिशूलाकारं वैष्णवे शंखचक्रगदापद्मलांछितं प्रतितोरणमेकमेकं
कीलमारोपयेत् ततो मंडपाग्रे दशहस्तदैर्घ्यं वंशदंडं वल्लवितं हस्तमात्रविस्तृतं पंचहस्तदैर्घ्यं
दातव्यं मंत्रदेवतावाहनमूर्त्यंकितं चरादिभूषितांगं समेतेमंत्र ततदेवतवर्णेन रूपवर्णेन वा ध्वज

मारोप्य दशदिक्षु बाहुमात्रदीर्घा यथायोग्यमानदंडावलंबिना ततो लोकपालवर्णेन तद्रूपवर्णे
तदीयलोकपालवाहनमूर्त्यंकिताः द्वादशांगुलविस्तृताः लोकपालांश्चैवोक्ताः ततस्तत्रेण पताका
सुवर्धीयते तत्रेंद्रस्य पीतवर्णः वह्नेः पिंगलवर्णा यमस्य कृष्णवर्णः नैरृत्यामणिवः वायोर्धूम्रवर्णः
सोमस्य श्यामवर्णः ईशानस्य श्वेतवर्णा ब्रह्मणो रक्तवर्णः अनंतस्य श्यामवर्णः इति पताकाभिरलं
कृत्य मंडपाभ्यंतरं स्वच्छेन वितानपुष्पमालादिभिरलंकृत्य मंडपाभ्यंतरं स्वच्छेन वितानपुष्पमाला
दिभिरलंकृत्याग्रास्य दलग्रथितदर्भवज्ररूप बर्धमालया मंडपमेतद्बहिस्तु परिवेष्यालंभ
तडकलैः सर्वेषां तन्मध्यगतेन वनरसं रूपेमध्यखंडे जपकोष्ठकाभिः त्रिगुप्यमध्ये चतुरस्रां द
र्पणोदरतिमया स्वतत्रयमध्यप्रदेशात्समंततो लोहस्तमात्रोच्छ्रायवती वेदीं विधाय इति मंडपनि
र्माणविधिः इत्यमंडपविधाय पूर्वादितोरणसमीपेषु शालिपुंजोपरि वक्ष्यमाणलक्षणं वक्ष्यमा
णविधिना प्रतिद्वारमेकमेकं कुंभं संस्थाप्य तत्र पूर्वदिग्गतकुंभे च वेदत्रिणोपवीं पश्चिमेवाका
ली उत्तरे विघ्नेशं संपूज्य तद्वन्मंडपस्य कोणचतुष्टये कुंभान्संस्थाप्य तेष्वाग्नेयकुंभेषु अनंतेनै
ऋते रुद्रं वायव्ये सिद्धार्थं ईशाने मंगलं च संपूज्य पुनः पूर्वादिकुंभेष्विंद्रादीन् लोकपालानावा

68

पूर्वादीन् मेषैः संपूज्य पुनः पूर्वादिदिशि ऐरावतं पुंडरीकं वामनं कुमुदं अंजनं पुष्पदंतं सार्व
भौमं सुप्रतीकं च संपूजयेत् इति दिग्गजान् संपूज्य भस्मिमंडपे पूर्वादिदिक्षु चतुर योनि अर्द्धचं
द्र त्रिकोण अष्टान्तषट्कोणपद्म अष्टास्त्रगान् अष्टकुंडानि कारयेत् तथा दीक्षाकतरस्य कुंडनिर्माणप्रकार
स्तत्रैव यः पूर्वभागे सार्द्धहस्तमात्रं भूमिं परित्यज्य प्राक्कल्पितान् दिक्क्रमेण प्राक्प्रवणायतं सूत्र
मास्फाल्य तन्मध्ये बिंदुं कृत्वा तत्र बिंदुपर्वतः पश्चिमतः द्वादशांगुलमानेन बिंदुं कृत्वा तत्र पि
कोणशेमार्जयित्वा तत्र बिंदुद्वयावष्टंभेन तत्र सूत्रं तन्मान क्रमेण पूर्वापरत किंचिदन्योन्यसंश्लि
ष्टं वृत्तद्वयं विचार्य तयो दक्षिणोत्तर हंसपद प्राकप्रत्यक् प्रसूत्र मध्यगत हंसपद सभेदाद
क्षिणोत्तरं तं विवृत्द्वयं विधाय तत्र दिक्कोणशेमार्जयित्वा तत्र सूत्रागाग्रं तत्र यावलंबेन द्वादशां
गुलमारोप्य वृत्तवृंदकोणे बपि हंसपदं विधाय तत् दंशापदपार्श्वे प्राकप्रत्यक् सूत्र हृदयं दक्षिणो
त्तरसूत्र हृदयं च संरभ्य यसूत्र चतुष्टयमास्फाल्य समचतुरस्रं कुर्यात् ततस्तस्य प्राक् प्रत्यगायत
गत्र्लसूत्रमानं निरंस्तं चतुरस्रं तत्र व्यातं कृत्वा तत्परितः कुंडमानस्य चतुर्विंशांशमितो म
वेधं परित्यज्य तद्बहिर्द्वादशांगुल विस्तारं चतुरंगुले मेघामेखलां कृत्वा तदुपरि वाह्य परितः

भेख
६५

69

चतुरंगुलमानेनप्रत्काश्यंगुल विस्तारा चतुरंगुलोन्नता द्वितीया मेखला कर्तव्या तदुपरि वा सैव चतुरं
गुलत्यक्ता विस्तारोन्नेत्याभ्यां चतुरंगुलमिता तृतीया मेखला कार्या तत्रैवेत्थमेव मेखला च
तुरंगुलविस्तृता नवांगुलोन्नता द्वितीया त्र्यंगुलविस्तारा पंचांगुलोन्नता तृतीया द्व्यंगुल
विस्तृता द्व्यंगुलोन्नता द्विमेखला मात्रमाद्यः तत्र मेखलायां सहस्रहस्तमात्रखात पक्षेत्येवं सह
स्रमात्रखातपक्षे सर्वेषां मेखलामाने विन्यास तत्प्रमदे द्वैके विस्तारोन्नेचयोः कुर्यादिति तत्र
राजवचनात् समसूत्रीकरणं विना क्रमाद्द्वादशाष्टचतुरंगुलोच्छ्रित सर्वत्र्यंगुल चतुष्क विस्त
ता मेखला सर्वत्र सिद्धियस्तन्मता इति प्रपंचसारे पूर्वोक्त एव पक्षः समीचीनः इति सिद्धांतः
ततः सर्ववापुरुषे मेखलामध्ये द्व्यंगुलयायामविस्तारमेकांगुलोन्नं चतुरस्रं पीठं सदा कर्तव्या
तदुपरि निहितं मूल द्वादशांगुल दीर्घो नरोत्तरस्थोन परिणाह मध्ये मेखला मज्ज्य कालग्रुता
मूले कुंभहयगुक्तां मध्ये समगता सपरितनमेखलोपरिगता षडंगुलमानविस्तार मध्यान्तवदे
शाङ्कमयपार्श्वतः अनेन संकुचिता सा हस्ता दशांगुलमानायामामेकांगुलोत्सेधाम स्वस्य पत्रोक्
तांमूलात् किंचित् कालान्तमात्रिश्रां रेखा कुंडशनिष्ठाग्रां योनिं कुर्यात् अग्रमध्ये कुंडस्य संमुख

द्वावलेवनेनप्रतिदिशंचतुरंगुलमानेवहलंनिष्पाद्यःपुनः षडंगुलमानेनवहलंकृत्वाहृतंक
र्णिकापविकल्प हृतंहृदयांतरालनीत्याष्टदलानि कृत्वा नाभिंकुर्यादिति इतिचतुरस्रकुंडनि
र्माणविधिः अथयोनिकुंडनिर्माणप्रकारः तत्रप्राग्वच्चतुरस्रंनिर्माय ततःकोष्ठयुगसतस्य
प्रसन्नसूत्रं तन्मानपंचमांशेन पूर्वस्यांदिशिवर्द्धयित्वा तत्कोष्ठचतुष्टयात्मकः चतुरस्रपश्चि
मभागस्यदक्षिणोत्तरकोष्ठयोर्नैर्ऋत्यांशेनमाग्नेयादिवायव्यांतंचकोणसूत्रद्वयास्फालनेन
लांछितसूत्रद्वयसंपातविदितमध्यदेशावष्टंभतत्कोणावधिमानेनोत्तरकोष्ठप्राग्भागप्रत्यग्भागल
सूत्र पश्चिमाग्राद्दि दक्षिणोत्तर तिर्यक्सूत्रोत्तराग्रावधि दक्षिणकोष्ठेतत्सूत्रपश्चिमादि तद्दक्षि
णाग्रावधिच भ्रमाद्वर्त्तुलद्वयमुत्पाद्य तन्मध्यतिर्यक्सूत्राग्रद्वयमारभ्य प्राग्प्रसारित भ्रमसूत्रा
ग्रावधिसूत्रद्वयास्फालनेन योन्याकारंक्षेत्रं परिकल्प्य तद्दक्षिणंकंठमेखलयोर्यथोक्त मानेनोत्कृष्टा
न्नायोनिमंडलद्वयंनिष्पाद्य प्राग्वत्तयानेकृत्वा कंठमेखलाकल्पयेदिति २ अथार्द्धचंद्रकुंडव
र्त्तनाप्रकारः तत्रप्राग्वच्चतुरस्रंचपाद्य तद्दिक्षुभ्रमानेदशयाविभज्य तेष्वेकैकांशं तन्मार्गचपश्चि
मयोः परित्यज्य विंदुद्वयं विभज्य विधाय तात्पश्चिमविंदुप्रान्तदक्षिणोत्तरायततिर्यक्सूत्रंतत्पूर्वतस्वाद

भैप
७०

द्विरंशांशत्रयमानत्र्यावधिकस्फाल्यतदग्रद्वयावधितकल्पितपश्चिमाद्ब्रह्मसूत्रसंधिमध्याव
लंबनेन प्राक्कल्पितविस्तारद्वंशांशमानेनभ्रमादर्द्धचंद्राकारं कुंडंभवेदिति ३ अथसमर्द्धचंद्राकारं कुं
डंपनिर्माय्यतद्बहिरष्टयुक्तयुक्तमापकांगुलमानेनवाईचंद्रनिभमंडलद्वयंकृत्वा प्रथमकृतमंड
लमध्ये हस्तमात्रनिम्नखातंकृत्वावहिकंठस्थानेपरिमज्य प्राग्वन्मेखलादिकंकुर्यादिति ४ अथ
त्रिकोणकुंडरचनाप्रकार तत्रप्राग्वच्चतुरस्रंकृत्वा तद्ब्रह्मसूत्रस्यप्रागग्रं वहिर्गत्याप्रसार्यतच्चतु
रस्रविष्कंभमानंषोडाविभज्य तेष्वेकैकांशमानेन पश्चिमतिर्यक्सूत्राग्रद्वयं पार्श्वद्वयोर्वहिः प्र
सार्य तदग्रद्वयात्तत्सूत्रमानोयेतसूत्रद्वयस्य प्राक्प्रमाविन ब्रह्मसूत्रस्यच त्र्यसंपातदवध्या
स्फाल्यत्रिकोणंकुंडंपरिकल्पतद्बहिरेकांशमानेनतद्बहिर्द्वादशांशमानेनचोक्तयुक्त्यात्रिकोण
द्वयंनिष्पाद्य खातकंठमेखलादिप्राग्वत्कल्पयेदिति ५ अथवृत्तकुंडरचनाप्रकार तत्रप्राग्वच्चतु
रस्रंतेनसाधयित्वा तन्मध्यविष्कंभमानमष्टादशधाविभज्य तेष्वेकांशमानेनचतुरस्राद्बहिर्ब्रह्म
सूत्रस्य प्रागग्रंविस्तार्य्य मध्यविन्दुमवलंब्य विस्तारितब्रह्मसूत्राग्रमानेनकंठार्थंवृत्तंकृत्वानत्वहिः
पुनर्द्वादशांगुलमानेन वृत्तांतरंनिष्पाद्य प्रथमकृतवृत्तमध्ये हस्तमात्रनिम्नखातंकृत्वाकंठवृत्ताद्व

७०

ह्निः द्वादशांगुलांतरवीथ्यां प्राग्वन्मेखलात्रयं योन्यादिकं च कल्पयेदिति अत्र वृत्तं कुंडे योनिर्नोक्ता केचि
त् योनिपद्मकुंडे नाभिश्च नास्तीति सिद्धांतः ५ अथ षडस्रकुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं विधा
य तन्मध्यमानं षोडशधा विभज्य तेष्वेकांशमानेन बहिस्तत्र समं विकारस्य तन्मानेन वृत्तरस्रमध्य
सूत्रं हस्तपदमध्यावलंबनेन भ्रमयेत् तन्मध्यविष्कुम्भमानार्द्धेन तन्मध्यान्निर्यत्सूत्रद्वादिशएगादिपरिलो
ख्य तेविद्धं षट्कं विधाय तत्र विद्धात् विद्धं ज्याद्यं सूत्रयन्क्रमात्सूत्रालग्नं तत्त्यायवत्स्य तत्त्वं डालिमा
र्जनेन षट्कोणकुंडं देशं निष्पाद्य तद्बहिः रेकांशतो द्वादशांशमितः योजयन्नायाषट्कोणं च यनि
ष्पाद्य खातादीनि प्राग्वत्कल्पयेदिति ६ अथ पद्मकुंडरचनाप्रकारः तत्र प्राग्वच्चतुरस्रं तं दे
त्रमष्टधा विभज्य तन्मध्यविद्धावलंबनेन परितो ऽंशत्रयमानेन कर्णिकावृत्तरस्त्र देशात् बहिः वृत्तं
निष्पाद्य तद्बहिरप्यंशत्रयमानेन केशरार्थं वृत्तं कृत्वा तद्बहिरप्यंशत्रयमानेन दलार्थं वृत्तं निरचय
तद्बहिरप्यंशत्रयमानेन वृत्तं भ्रमयित्वा तद्बहिरपि साईषट्नयमानेन वृत्तमेकं भ्रामयेदिति
वृत्तपंचकं कृत्वा द्वितीयवृत्ते पंचम वृत्तयोरंतरालमानकर्कटेन केसरवृत्तानामन्तर्वालवृत्तस
मष्टमयाबकारषोडशाग्रं ईचंद्राकं निष्पाद्य वृत्तसाधानष्टदलानि कृत्वा तन्मध्य कर्णिकाह

भैषा
७२

7/

तं विहाय केशराणि कर्णिकापरितः प्रकाशयन् केशराग्रं तं च सम्यक् खनित्वा वर्तुलं पंचमहत्तयो
दलानि साग्राणि यथा भवति वर्तुलकुंडस्य विस्तारायामत्वात् तस्य समानत्वं तस्य फलवत् तेष्वमले
यथा भवति तथा शुक्लत्वेनानेन विधाय वृद्धिः यस्याकारेणैव कंटमेखलादिकं कुर्यादिति ७ त्र्यस्रकुंड
रचनाप्रकारः तत्र प्रागग्रं वर्तुलं विधाय तन्मध्ये सूत्रमानं चतुर्विंशति द्वाविंशाष्टैकैकोशमाने तदहि
प्रतिदिशं प्रसार्य तत्सूत्राग्रे पूर्ववच्चतुरस्रं शोभनक्रमेण विधाय तत्कोणसूत्रस्यार्धमानेन वामस्रवतर
स्रेकोणं वर्तुलाच्च यत्नस्थावर्तं भाडभयतः प्रतिरेखं चिह्नद्वयक्रमात् संभूय अष्टचिह्नानि कृत्वा तत्
चिह्नचिह्नं प्रागवत् सूत्रं चतुष्कमास्फाल्य तद्दिग्गतकोणे वामाग्रे स्थान्यानाद्दृष्टं से कुंडं भवति १ स्पष्ट
षोडशकुंडं तेरे परिकल्प्य स्थानकंटमेखलादिकं यथावत् कुर्यादिति १ निदीनायामष्टौ कुंडानि
कार्याणि श्रुधप्रसंगमंगलाकामग्रहोमार्थं च पंचाशत् समास कुंडयोरपि लक्षणमुच्यते तत्रादौ
वासकुंडनिर्माणप्रकारः तत्र प्राग्वत् वर्तुलं तन्मध्ये कृत्वा समसंशेन बाह्यसूत्रस्य प्रागग्रं
वहि विकारयत् मानेन तच्चतुरस्रमध्यस्य हंसपदावलंबलेन प्रमाहूते निधाय तच्चतुरसमध्य
मूलं च तदीकृतानेन शतवेणंशतवेणा तत्सूत्रे बाह्यसूत्रप्रागग्रादि पातितः पंच चिह्नानि विधाय तत्र

विद्धाच्छिद्रं स्यादृणानि पंचसंख्यान्यास्फाल्य ततस्त्याय ततखंडमार्जनान्येव सत्कुंडं भवति इत्थं पंचाष्ट
कुंडे देवे परिकल्पनं द्विरपि प्रोक्तयुक्त्या कुंडमेखलार्थं पंचाष्टहयं परिकल्प्य स्नानादिकं परि
कल्प्य प्रागवत्कल्पयेदिति ॥ ४ ॥ अथ समास्रकुंडनिर्माणप्रकारः तत्र प्रागवत्स्त्र चतुरस्रं कृत्वा तन्म
ध्यमानं दशधा विभज्य तेषु कोशमानेन ततश्च सूत्रं बहिर्विकाश्य तन्मानेन तच्चतुरस्रमध्यस्थ
हृस्वपद मध्यमवलम्ब्य हस्तं कृत्वा तच्चतुरस्र मध्यसूत्रमानं चतुःषष्टिधा विभज्य त्रियंशमानेन
बहिःसूत्र प्रागग्रादारभ्य हस्तेस्म विद्धानि कृत्वा विद्धाविद्धं स्यात् रूपेण सम्यक्सूत्राणि स्फाल्य त
तस्त्याय रूपहतखंडमार्जनादेतत्समास्रं वायुदिग्गतं चापि राशिस्थानप्रोक्तं वैरिनाशकरं कुंडं
भवेदिति इति दशविध कुंडनिर्माणप्रकारः ५ अथ दीक्षायामष्टौ कुंडानि कार्याणि अथ कुं
डकरणे शक्तो प्रागादिवर्तुदिक्षो चतुरस्रार्द्धचंद्रवृत्तपद्माख्यानि च कुंडानि कुर्यात् तत्राप्यशक्तौ
विदेशानयोर्मध्ये चतुरस्रमेवाथवा यत्कुंडमेव कुर्यादिति अथैतेषां कुंडानां काम्यहोमेषु कुंडभेदेन
फलभेदः तत्र कलप्रकारं तत्रैव चतुरस्रं तु भवेत्साध्यसिद्धिकरं च तत्र भोगाः शुद्धा योनिकुंडेषु
द्वंद्वं शुभावहं मारणे केचिदिच्छन्ति त्रिकोणं द्वेषकारकं रिपुघातकरं केचित्तद्वतं शांतिकारं ज्ञ

गुः षट्कोणमस्त्रादस्तिकुंडे श्रवविशिष्यते हस्तिदंष्ट्रश्चिदं वापि पद्मकुंडे विशुद्धपाः अष्टकोणे तम
मोत्पादरोगोपघातिके चन पंचकोणं चाभिचारसमने भूततंत्राने सप्तास्रमेवं विज्ञाय काम्यकर्मा
णि साधयेदिति अथ वर्णभेदेन कुंडभेदः कुलमूलाचलादे वर्णानामादितः कुंडान्युक्तानि क्रम
तः शिवे चतुरस्रं वृत्तमर्द्धचंद्रः त्र्यस्रमिति क्रमात् सर्वेषां चतुरस्रं वा दीक्षातत्त्वे शिवे अथ कुंड
स्वरूपं महादशनाविचक्षणमते शरीरे परंशरीरे प्रकृतिः कुंडस्वरूपं गुरुः याम्यसौम्येकरौ कुंडमुदरं पश्चि
मेतथा योनिश्चुवरणे प्रोक्ता सर्वतंत्रेषु शोभवीति अथ होमसंख्याभेदेन कुंड मानभेदः तचलक्ष
मागरे पंचाशत्प्रतिहोमे कुंडरत्निमितं भवेत् अरत्निमात्रं तु सहस्रमिति होमके चतुर्विंशत्यंगु
लाष्टोहि हस्तमयुतेमते चतुर्हस्तमितं लक्षे षट्करं दशलक्षके कोटिहोमे वाष्टहस्तं कुंडं कु
र्यान्महेश्वरी प्रकारेवत्तद्वैव एकलक्षं समारभ्य यावल्लक्षाष्टशालक्षकं तथैव हस्तमारभ्य दश
हस्तं विवर्द्धयेत् कोट्यादशलक्षं कुंडं यथाशक्ति परमेश्वरीति एतमत्र यष्व्यके वलहस्तहोमेपि विशे
षे तत्रविस्तारस्याप्रियाजनाभावादिति अथैतेषां हस्तादिकुंड विशेषाणां मानोगुलतंत्र
फलानि चलक्षणसंग्रहे फलांगुलानि यावंति हस्तदेहे भवंति हि हिहस्तस्य तु कुंडस्यैतो देश

ण्वमिष्यते दलदैर्घ्यांगुलान्यष्टौ सप्तसप्तसद्दैर्वेव शतानि पंचाविंशतिः तेन तत्कमलमध्यसूत्रकम् चतुर्विंशत्यं
गुलानि विदध्यादिकेश्वरेषु नः अंगुलानि द्विपंचाशदेकादशशतानि च तद्भिन्नमध्यतो लक्ष्यावतत्र्यं चार्द्ध
संयुते चतुःसप्तशतयाष्टकायवासप्तत्येव च अंगुलानि च यत्त्रिंशत्सार्धं तेन सूत्रेण मध्यमे सप्तदशशतान्यष्टा
विंशतिरंगुलानि च देवस्य चतुर्दलस्य मानमेवमुदीरितं तत्कमलमंगुलान्येकचत्वारिंशच्चतुर्यवाः
यूकाचतुष्टयं किंचिन्न्यूनं लिख्यो चतुष्टयं चतुरंगुलयुक्तानि त्रयोविंशच्छतानि च चतुर्दलस्य ऊर्ध्वस्य
मानमेवमुदीरितं मूलेऽस्यांगुलान्यष्ट चत्वारिंशन्मितं भवेत् तत्सूत्रेण ततः पंचदलदैर्घ्यांगुलानि च
द्विसप्तत्येशतान्यष्ट वशानीजमच्यते अरत्नानि त्रिपंचाशविलक्षोनाश्रुवाऽस्यवाः मध्यसूत्रेऽवि
दं मानं कटकेरेतेत्र मच्यते षट्पंचाशदंगुलानि चतुर्विंशच्छतानि च तत्कमलमष्टमे पंचदंगुला
नि च षट्युक्ता किंचिद्भागाधिकं यूकाद्वयं सप्तकरस्य च वेदसंख्या सहस्राणि द्वाविंशत्संदिनानि च
मूले चतुर्यवैः शाकं त्रिषष्टिरंगुलानि च तत्सूत्रेण तत्राष्टदलदैर्घ्यांगुलानि च वेदसंख्या सह
स्राणि साष्टानि षट्शतानि च अंगुलानि तथा सप्तषष्टिसमयुवा पुनः किंचिद्धीनं मूलमस्य नव
दलेऽत्र दृश्यते शतानि चैकपंचाशच्चतुर्भिरधिकानि च अशीतिरंगुलान्यष्टेत्र मानमिदं भवेत् द्वा

भैपा
७३

समतीरंगुलानि देवस्यादशहस्तमितस्य च सतानां च संख्यानि मुनिसंख्याशतानि च षट्त्रिंशक
खितामग्नुतकूलबलसूत्रकम् वर्द्धयेत्संचसमसंख्याधिकैः समयवैस्तथा अल्पाधिकाभ्यां लक्षाभ्यां
साकमेकं प्रकल्पयेत प्रतियत्नसमास्थायकुंडानि रचयेत्सुधीः द्विहस्तादिमितानां चातिमाने
कुर्यादेशिवे इति प्रतियत्नामति विसरेणवादिहस्तपर्यंतानभेदान्समग्रविधाय कुंडविस्तारयथा
मामानतिस्तथानाधंतेय थोक्तमानकंटमेखलादिकं चकुर्यादितिसर्वं इदंचंप्रतिप्रयत्नसा
ध्यतात् चरसेरावादिमानभेदास्तु लक्षणसंग्रहे जालांतरगतेभानौ यत्सूक्ष्मं दृश्यतेनरैः
प्रथमंतत्प्रमाणानां त्रसरेणुप्रचक्षते त्रसरेणुर्विज्ञेयोवाष्टौस्तुः परमाणवः परमाणोरष्ट
गुणेरथरेणुस्तुसंस्मृतः रथरेणुर्बलेषष्टौ वालाग्रंतत्त्वमंतुधैः वालाग्रेष्टभिर्विद्यातेयेकाचैकधि
तोवुधैः अष्टाभिर्यूकायवंप्राहुरंगुलंतद्यवाष्टकं रत्निस्तंगुलवर्णाणि विंतैकस्तैकविंशति करपर्वेक
लोशेतनतोरत्निस्तदाहृतः चतुर्विंशतिस्तैवहस्तसंदंगुलानिविंशति तथा च विंशद्विस्तृतर
धिकाभिरंगुलाभिः सूत्रेणाप्यथपरिस्तृतभूमिभागंतामभिसुप्रवरतन्तु तावतीभिरंशामितिप्रपंचसा
रवचनात् यवहेकुंडविस्तारः तत्रनंतावदेवहस्तशब्दावचनात् कुंडविस्तारस्तानिस्त्रमितिवा ७३

यवीयसंहितावचनात् चतुरस्रं चतुष्कोणं हस्तैकं कृत्वा यथागुरु हस्तमानेन तन्मध्ये तावत्त्रिस्थायतं खनेत्
दिति दिव्यसारस्वतप्रयोगसारवचनात् चतुर्विंशांगुलायामं तावत्खातसमन्वितमिति गणेश
रुपसमर्पणीयवचनात् विंशतिवचनात् संख्याभिरंगुलीभिः सुविस्तृतं खातं चतुरस्रं कुंडमि
ति दक्षिणमूर्तिसंहितावचनात् कुंडविस्तारायाममानं निम्नत्वं खाते कर्तव्यमिति सिद्धांतः अत्र
केचित् हस्तमात्रं खनेन्निर्य ऊर्ध्वमेखलया सहेदिति होमसारवचनात् पंचत्रिमेखलोच्छ्राया
ज्ञात्वा शेषमपः खनेदिति प्रतिष्ठासारसंग्रहवचनात् व्यासमानखातः कार्यः प्रोक्तो निम्नत्वमथांगु
लेनेत्यादिति विश्वकर्मवचनात् कुंडं जानुशैलेस्तिर्यगूर्ध्वमेखलया सहेति प्रथमतंत्रवचना
त् खातं कुंडप्रमाणेन ऊर्ध्वमेखलया सहेति सिद्धांतशेखरवचनात् मेखलया सह हस्तमात्रं खातं
वदंति एतदर्थं मेखलयातनगमनेन खातस्याप्यनतगमनप्रसंगात् खातं कुंडायतेनत्र मे
गलगास्यकीर्तितं सन्निपत्योपकारेण मेखलादेर्विशिष्यते इति योनीहृदयवचनात्संनि
पत्योपकारे कस्य खातस्यारोपकारो मेखलायसह निर्वाहितोऽविंस्यात् विशेषिद्ध समवायो
ऽप्यसंभवात् सदमीमिति न्यायात् उक्तपक्षसैव युक्तत्वात् तस्मान्मेखलाया सह खातवच

मेपा
७४

76

नान्निसप्तरलादिकुंडेषु पंचाशदादिहोमविषयत्वोनाधिकाप्रयोजनाभावात्तद्विषयत्वेति मेख
लानि अथात्तमेखलापंचकाकार्याः षट्पंचाष्टत्रियत्नकोरिति लक्षणसंग्रहवचनात् षट्का
ण्यपि वह्निनेत्राभितास्तुः पंचमेखलाः इतिसिद्धान्तशेखरवचनाच्च पंचमेखलाः कार्याः अथ
कुंडानामयथाकरणे दोषाः तत्रविश्वकर्माख्यानाधिके भवेद्रोगी हीने धेनुधनक्षयः वक्र
कुंडे संतापो मरणं छिन्नमेखले मेखलारहिते शोको अधिको वनसंक्षयः भार्याविनाशकं
कुंडे प्रोक्तं योन्या विनाकृतं अपत्यध्वंसनं प्रोक्तं कुंडं यत्कुंडवर्जितमिति न्यूनाधिकप्रमाणे यत्त
कुंडे फलमेखले संतापरहितेयत्र यजमानविनाशकृदिति तथा वशिष्ठः अनेकदोषदं कुंडम
त्र न्यूनाधिके यदि तस्मात्सम्यक्परीक्ष्यैव कर्तव्यं शुभमिच्छतेति तथा जयद्रथयामले न्यूनाधिके च
हे होमानहीने दरिद्रता वा योन्यप्रके च हीनस्यासिद्धेर्न्यूनत्वात्तके अधिके चान्तरे भोगामानेना
धिकमेखले व्याधयः संप्रवर्तन्ते वियोनौ स्यात्त्रयस्त्रयः उत्पाटस्फुरिले छिद्रसंज्ञकं वा ख्यनाभ
वेदिति इत्यनिदाश्रवणं यथोक्तलक्षणसंपन्नानि सर्वाणि कुंडानि कार्याणीति अथ कुंडः
तत्र वशिष्ठः कंठोह्यथवमात्रस्यात्कुंडे तत्करमात्रके शतिकालोत्तरे खातादात्संगुलः कंठः सर्वकुंडे

७४

षड्यंविधिः चतुर्विंशतिमंभागमेगलेपरिकल्पयेदिति अथयोनिः तत्रस्थापयेन्मेखलामध्य
तो योनिः कुंडाद्दाद्दशांशविस्तरा सिद्धांतशेखरेपि दीर्घार्कपर्वभिर्योनियोनिविस्तारेणषडंगुला
उन्नतिनिर्दिश्यगलेभ्यासादिति योनिः सर्वकुंडेनरेष्यारकविधिनास्थापयेपि तत्रचतुरस्रे अर्द्धचंद्र
कुंडे च योनिर्दक्षिणभागस्थामेखलोपरिस्थाप्या तयोर्मध्ये चोत्तराभिमुखत्वमात् अन्येषु कुंडेषु पश्चिमे
मेखलोपरियोनिःस्थाप्यानेपुत्रहोतृदक्षिणं पूर्वाभिमुखत्वात् होतृत्वेयोनिरास्मात पर्यस्यापयश्चतदि
तिवचनात् आसांमेखलानां इतिश्रीभैरवार्चापारिजाते दशमस्तबकः ॥ ९ ॥ अथवास्तुपूजा तत्रधाक
लक्षणमंडपेनैर्ऋत्यकोणे हस्तमात्रं विस्तारायामावित्ततत्रतामसमचतुरस्रां वेदिकामितिस्ल
क्षणं कृत्वा तत्रवायव्यकोणादाग्नेयकोणगतं नैर्ऋत्यकोणादीशानकोणगतं चेति कर्णसू
त्रद्वयमास्फाल्य वास्तुचक्रं निर्माय तन्मध्यगतकोष्ठचतुष्टयमेकीकृत्य तद्बहिः प्रागादिप्र
दक्षिणं प्रतिदिशं चतस्रारिकोष्ठानि मध्यकोष्ठसंलग्नान्येकीकृत्य सर्वमध्ये ॐब्रह्मणेनमः
पूर्वादिप्रदक्षिणं ॐअर्यमायनमः ॐविवस्वतेनमः मित्राय इतिप्रादक्षिण्येनसंपूज्य आग्नेया
दिकोणचतुष्कगतानीकोष्ठचतुष्केषुप्रादक्षिण्येनैशानकोणपर्यंतं ॐसावित्रायनमः एवं

सविशे शाकाय नमः शालकिनि रुद्राय नमः रुद्रकिते अंद्योश्चाय वत्साकाय नमः इति संपूज्य त
तद्बहिस्थ वीथ्यामाग्नेयादि कोणचतुष्कगतः कोणस्थभिन्नकोष्ठ चतुष्टयपार्श्वगतकोष्ठा
नि वायादिईशानपर्यंते ॐ सर्वाय नमः एवं गुहाय अर्यम्णे जंभकाय पिलिपिच्छकाय चरकी
विदार्यै पूतनायै इति संपूज्य ततस्तद्बहिर्गत वीथीचतुष्टये प्राच्यादिगतवीथ्यां ईशाना
द्याग्नेय पर्यंते ॐ ईशानाय नमः ॐ पर्जन्याय नमः जयन्ताय॰ शक्राय॰ भास्कराय॰ सत्याय॰
वृषाय॰ अंतरिक्षाय इत्यष्टौ देवताः संपूज्य दक्षिणवीथ्यां आग्नेयादि नैर्ऋते ॐ अग्नये नमः
एवं पूष्णे वितथाय॰ वृषाय॰ गृहक्षतकाय गंधर्वाय भृंगराजाय मृगाय नमः इति संपू
ज्य ततः पश्चिमवीथ्यां नैर्ऋत्यां वायव्यांते ॐ निर्ऋतये नमः एवं दौवारिकाय सुग्रीवायः
वरुणाय पुष्पदंताय असुराय शोषाय नमः इति संपूज्य उत्तरवीथ्यां वायव्यादि ईशांते ॐ
वायवे नमः एवं नागाय मुख्याय सोमाय भल्लाय अर्गलाय आदित्यै दित्यै इति गंध
पुष्पाद्यैर्वास्तुदेवताः संपूज्य तथा च वस्तु षष्टिकोष्ठानि वस्तुमानं पंचवर्णरजोभिः रापूरय
ॐ ब्रह्मणे एष बलिर्नमः इत्यादि संपूजित देवतानां पुरतो नानातिलतण्डुलकदलीफलापूपना। ७५

75

नावेंजनाद्भिः पायसैः तन्मैत्रस्यैव बलिं निवेदयेदिति इति वास्तुपूजाविधिः अथ वास्तुपूजाफलं त
दकरणे दोषाश्च तंत्रराजे एवं सिंहगते भानौ पूर्णायां प्रतिवत्सरं यस्तु हे वास्तुपूजायां मंडले तन्ममाव
येत न वालमरणं व्याधिभूतप्रेतादिकानि च नश्यंपीड्यन्ते नामकलहादिशुभानि च पुत्रपौत्रधनारो
ग्यपशुदासीसमृद्धिभाक् आरोग्यविजयी स्थानचिरंजीवी सत्वलोमृदहे राजवेश्मसमर्वत्र नथा च म
हिषीगृहे मायावमानलेनाभिभवनेन पुरीषवा विद्यान्नामनिवर्षतः प्रोक्ता सिद्धिदेशिकः न चे
युक्तं नाल्पफलैः क्लेशानि शं भवेदिति अथ वास्तुरार्पणविधिः तत्र दीक्षादिनात्पूर्वमेव नवभिः सप्त
भिर्वैदितैः प्राङ् निर्मितमंड पस्योत्तर भागे सुसंहतं गृहं निर्माय तत्र गोमयोपलिप्ते सुसमे भूत
ले प्रागग्रवक्रायतनानि सीतारेखायाम्योदीच्या पत्रांश्च समरेखाः कृत्वा द्वादशपदोपेतं मंडलं निर्मा
य तत्र चतुः कोष्ठैः एकमेकं विस्तृतद्वारं पश्चिममध्यपूर्वक्रमेण परिकल्प्य तत्र पश्चिमा
दि चतुष्कत्रयेपि प्रति चतुष्कं आग्नेयकोष्ठमारभ्य ईशानकोष्ठपर्यंतं पीतरक्तश्वेतश्यामवर्णैः
रजोभिः चतुष्कमेकैकेन रजसैकं कोष्ठमिति क्रमेण द्वादशकोष्ठान्यापूर्य तत्स्थानचतुष्के वि
स्तृदेवता चतुर्विंशत्संख्यानानविहारनिपुणाः डमरुकाकाराश्चतस्त्रः पालिकामध्ये पिप्पल

भैरा
१९

दलाग्रपल्लवैः सहस्रेणसंवेष्ट्यसंस्थाप्य तथामध्यचतुष्कयेकस्मिन्पात्रेचैवपात्राणियथा
भवति तथाशिल्पिवरान्निर्मितानि शम्बत् डमरुककाराणि षोडशांगुलोन्नतिविस्तृतानि शुक्ला
निबलदेवयानि चत्वारि पात्राणि तथैवपद्मदलादिशुक्लानि संस्थाप्य तथापूर्ववत्तथैव द्वाद
शांगुलोन्नतिविस्तृतानिस्ततः शिवदेवतायाः प्राग्वत्पिप्पलदलादिशुक्लचत्वारः सप्तसंस्थाप्य इतिद्वा
दशपात्राणि प्रक्षालितानि द्वादशकोष्ठेषु प्रतिकोष्ठमेकमेकंपात्रं शालिपुंजेषु गंधाक्षतकूर्च
युक्तं संस्थाप्य तानिपात्राणिवालुकाः सकरीषकैः संपूर्यएकस्मिन्नूतनभांडे स्वर्णादिरचिते
स्वर्णमयेवाप्रियंगुश्यामाकतिल सर्षपशालिमुद्गाढकीनिष्पावमाषाख्यानिषड्दशधान्येकीकृ
त्य वमितास्तनवीजेन गोडगंधैः प्रक्षाल्यशर्वसनादिपंचवाद्यघोषपुरस्सरं तेषुपात्रेषु प्रथमंब
लदेवतायैत ततोविघ्नदेवतेषु ततः शिवदेवतायैइति क्रमेणबीजानिनिर्वाप्य हरिद्रामिश्रितजलै
स्सिंच्य नूतनवस्त्रेणाच्छाद्यसंध्ययोरर्द्धरात्रेच समस्तेष्वपिदिनेषु प्रतिदिनंबलिंदद्यात् तत्रप्रथम
दिवसेतिललाजामलकशाल्योदनानि हरिद्राचूर्णमधुनासमेकीकृत्य कवलत्रयंनिष्पाद्य पात्र
त्रयेकृत्वा त्रिविधस्त्रापिपात्रसमेपत्रिकोणमंडलत्रयेस्थापितं तद्दह्निपात्रोनिधाय प्रथमंबलदेव

76

तस्य पात्रस्य समीपे सर्वभूतानि इह आगत्य इहातिष्ठन्ति शीतिं भक्ताद्यावाहनं संस्थाप्य ॐ सर्व
भूतेभ्यो नमः इति गंधादिभिः संपूज्य ॐ सर्वभूतबलिदृष्ट्याय नमः इति बलिद्रव्यं च संपूज्य हस्ते ज
लं गृहित्वा वामहस्तेन बलिपात्रं स्पृशन् ॐ सर्वभूतेभ्य एष बलिर्नम इति बलिपात्रोपरि जलमुत्सृ
जेत् प्रोक्तकालत्रयेपि बलिदानविधिः ततो द्वितीयदिने पितृभ्यास्तिलतंडुलैः प्रागुक्तपरिपाट्यैव
प्रोक्तकालत्रयेपि बलिं दद्यात् तत्रैव तृतीयदिने नागेभ्यो नारिकेलजलाक्तशाक्तपिष्टबलिः पंचम
दिने ब्रह्मणे पंचामृतेन बलिः षष्ठदिने शिवाय पयसंयुक्तोदनबलिः सप्तमदिने विश्वेभ्योद
नबलिः नवरात्रिपक्षे तु विल्वपत्रैः अष्टमदिने दुर्गायनबलि नवमदिने कृशराबलिर्देयः अत्र
सर्वत्र बलिदाने प्रथमदिने प्रोक्तमेव विधिर्ज्ञेयः तत्र तत्राग्र्यजनेन स्वल्पत्सर्जनं वा नेयमिति अत्र त
त्र सप्तदिने प्रभृति दिनं तत्तद्देवताबलिदानानंतरं दशदिक्पालेभ्योपि तत्तद्देवताबलिदानानं
तरं दशदिक्पालेभ्यो तत्तद्दिनबलिर्देयः ॐ इंद्राय एष बलिर्नमः इत्यादि तत्र नवान्नाद्यशर्करा
सहितपायसेन बलिर्देयः इति बीजारोपणविधिः अथ दीक्षाकालः तत्रादौ मासाः तत्रैव
वर्तते चैत्रे दुःखाय दीक्षा सर्वा वैशाखे सर्वसिद्धिदा ज्येष्ठे मृत्युप्रदा आषाढे बंधुनाशिनी श्रा

भैषा
११

77

वैशाखे फलदा ज्येष्ठे मरणं भाद्रे दुःखदा मता आश्विनी सर्वसिद्धिदा स्यात् कार्त्तिके ज्ञानहा इदा शुभदा मा
र्गशीर्षे च पौषे सर्वपापविनाशिनी माघे सुवर्णलाभस्यात् फाल्गुने सर्वसिद्धिदा तथा सारसंग्रहे
मधुमासे भवेद्दुःखं माधवे रत्नसंचयः मरणं भवति ज्येष्ठे चाषाढे बन्धुनाशनं समृद्धिः श्रावणे ज्ञानं
भवेद्भाद्रपदे क्षयः प्रजानामाश्विने मासि सर्वतः शुभमेव हि ज्ञानं स्यात् कार्तिके सौख्यं मार्गशी
र्षे भवत्यपि पौषे ज्ञानक्षयं माघे भवेन्मेधाविवर्द्धनम् फाल्गुणेपि समृद्धिः स्यान्मलमासं परित्यजेदि
ति तथा श्रीकण्ठसंहितायां शरत्काले च वैशाखे दीक्षा श्रेष्ठफलप्रदा मार्गफाल्गुणके श्रेष्ठा ज्ये
ष्ठे च वत्सरापदा माघमासे तु शुभदा दुःखदाषाढमासके आनन्ददा श्रावणे सा पौषमध्ये च निन्दि
ता तथा ज्ञानार्णवे शुक्लपक्षे शुभदिने शुभवारे वरानने मन्त्राद्यारम्भं कुर्यादिति तथा कालोत्तरे
मुक्तिकामैः कृष्णपक्षे भुक्तिकामैः सिते सदा दीक्षा कार्या महादेवेति तथा शैवागमे शुक्लपक्षे प्र
कुर्वीत कृष्णे वा देशिकोत्तमः शुक्ले सर्वसमृद्धिः स्यात् कृष्णे मध्यमता भवेदिति अथ नक्षत्राणि चिं
तामणौ अश्विनी रोहिणी चादौ तथा पुष्योत्तरात्रयं हस्तचित्रास्वातिमैत्रविशाखा श्रवणधनिष्ठया शत
भं रेवती च दीक्षायामुत्तमा मता तथा कामधेनौ रोहिणी मृगशीर्षं च तथा पुष्यश्च हस्तकः ११

स्नानन्नरापारेवतीचवनस्याचाप्युत्तरयंतरा शुभामेतानिदीक्षायांनक्षत्राणिवराननेइति अथानि
षिद्धानि पिंगलमते कृत्तिकायांमनस्तापोभरण्यांचमहाभयः पूर्वायांदंडयेद्राजामघायांम
मृत्युमादिशेत् मूलेनकलहंविशाखेक्षेमवतिद्वान्तिदा पूर्वाषाढेभयंप्रोक्तंश्रवणेनेकरोगदा श
तभिषायांलोभदास्यात्संतापंभाद्रेतथापि अथतिथयः तथासारसंग्रहे पूर्णिमापंचमीचैव
द्वितीयासप्तमीतथा त्रयोदशीचदशमीप्रशस्तासर्वकामदा तथाश्रीकंठसंहितायां द्वितीया
सप्तमीश्रेष्ठाषष्ठीसर्वत्रनिंदिता द्वादश्यामपिकर्तव्यंत्रयोदश्यामथापिवा विजयामालिनीतं
त्रे पंचम्येकादशीशुक्लासप्तमीचत्रयोदशी दशमीशुक्लपक्षस्यद्वादशीचविशेषतः रत्न
सागरे तृतीयाविहितानित्यषष्ठिसर्वत्रनिंदिता सप्तम्यांधनलाभस्यादष्टम्यांगुरुनाशनं
नवम्यांरिक्तानाशस्याद्दशमीशुभदायिनी एकादश्यांभवेल्लाभोधनस्यबहुभस्यच द्वादश्यां
धनलाभस्यात्त्रयोदश्यांमदोदयः शिष्यहानिश्चतुर्दश्यांपूर्णमासीतिसिद्धिदा अमायांगु
रुनाशस्यात्प्रतिपत्तुद्धिनाशिनी अथदेवताविशेषेतिथिविशेषः ब्राह्मणः पौर्णिमास्व
क्ता द्वादशीचक्रपाणिनः चतुर्दशीशिवस्योक्ताचाचः प्रोक्तात्रयोदशी द्वितीयातस्त्रियंःश्री

क्तापार्वत्यास्तुल्यतीयकाचन्नर्थीगणनाशस्वभानोः प्रोक्तात्सप्तमी अथवास्त्राणि तत्रमेत्रस
ज्ञावे मेत्रार्कभे रवौ शुक्रे तु पैत्र्ये जीवे विशेषतः शनौ स्त्यन्त्यभौमे सोमे सर्वं च निष्फलं सारसंग्रहे
रवौ गुरौ बुधे शुक्रे कर्तव्यं पवमेसरी इति ज्ञानावरारोहे मंदं द्वादिवचनः विजयमालिनीतं
त्रे रवौ बुद्धिमवाप्नोति शुक्रे वैवधनागमः बुधे सिद्धियोगवह्नितो गुरौ भ्रवाग्निनो भवेत् शन्यंगा
रकयोस्त्वविघ्नो सोमके भवेत् इति ज्ञानावरारोहे दीनादशाहिशालयीति अथ योगः
तत्र रत्नावल्यां योगास्तु योगास्तु प्रीतिराधुष्मा सौभाग्य शोभनः शुभः स्वकर्मा च धृतिः वृ
द्धिः तथा मापि श्रुहर्षणः वनश्चापि शिवः सिद्ध ब्रह्मेन्द्र श्रुव शोडशी अथापयोगः तत्रैव
पूर्वाषाढांशतपदापंचमी कृत्तिका तथा पूर्वाभाद्रपदा षष्ठी दशमी रोहिणी तथा द्वादशी सर्प
नक्षत्रमर्थमा च त्रयोदशी नक्षत्रलेपायते देवानामपि लासदार्यत सर्पनक्षत्रमश्लेषा अर्यमा उत्त
राफाल्गुनी तथा ज्योतिःशास्त्रे नीचस्थे वक्रसंस्थे प्यतिचरणगते बालवृद्धास्तगे वा संन्यासो यत्र
यात्राव्रतनियमविधिः कर्णवेधस्य दीक्षा मौंजीवंधो गनानांपरिणयनविधिर्वास्तुदेवस्य प्रति
ष्ठावर्ज्याः सद्भिः प्रयत्नास्त्रिदयाति गुरौसिंहगे नैव कुर्यात् अथ करणानि तत्र रत्नावल्यां शुभा

निकरणमाहृदीक्षायांचविशेषतः शाकंभ्यादीनिविष्टिंचविशेषेणविवर्जयेत्इति अथादिप
देन किंतयच्चतत्मदनागानोथहृएं अथलग्नानि तत्रसारसंग्रहे मेषाधारंभनेमेषपनयाम
प्रदंभवेत् वृषेमरणमाप्नोतिमिथुनेपत्नानाशनं कर्कटेसर्वसिद्धिस्यात्सिंहेमेधाविनाशनं कन्या
लक्ष्मीप्रदानित्यंतुलायांसर्वसिद्धयः वृश्चिकेस्वर्णलाभस्यात्धनुःसंतानविनाशनम् मकरःपुत्रदः
प्रोक्तः कुंभेपनसमृद्धिदः मीनेदुःखप्रदोनित्यमेवराशिफलंप्रिये तथारुद्रयामले मीने
सिंहेतथाचापेवृषेदानिप्रजायते मेषसर्वसमृद्धिस्यात्कन्यारत्नप्रदाभवेत् तुलायांपत्तयानेस्या
वृश्चिकेसर्वसिद्धयः मकरेपुत्रलाभःस्यात्कुंभेपशुसमृद्धयः मिथुनेशुभनाशःस्यात्क
र्कटेराज्यदोमतः पर्वलग्नफलंत्यान्यामेवंदशाविशालधीः वृषेमीनेतथाचापेसिंहलग्नवि
वर्जिते सत्वदंशुभदंनित्यंकन्याख्येसर्वसिद्धिदमिति अथपर्वदफले जन्मत्रिषट्सप्तमैकादशापे
क्षिगः शशिशुभफलप्रदोमतः नेत्रद्वादशवसुपंचवेदयहृराशिगः शशिदुष्टस्मृतः अ
पदीक्षाकालः तत्रशैवागमे अयोगमेशुभमेवंवदशुद्धौविशेषतः कृत्सेताराबलंकुर्यात्त
नामादिविचिंतनं धर्मदःप्रातःकालस्यात्संगराज्यवदस्मृतः मध्याह्नेसर्वसिद्धिस्यात्सायाह्नेम

भेष
१५

79

धर्मो भवेत् रजनीमंत्रदानेन तु निषिद्धा देशिकोत्तमैः दिवा सर्वं प्रकुर्वीत सिद्धिपर्वमेस्मृतमिति अ
योमुखेनतत्त्वाणि मूलाग्रेयमथा हि देव भवणीसात्यामणिपर्वाद्वयं ज्योति विद्धि वयोमुखेहिन
वर्कं भानामिदं कीर्तितं वापीकूपतडागगर्तपरिखानां निधेरूप्यते तेयोद्धृतविलप्रवेशनानि
नारंभप्रसिद्धं ज्ञातिव हिदेवविशाखा अश्वदीक्षायां कालविशेषः तत्र ज्ञानार्णवे मंत्राधारं भवेत्कु
यीग्रहणे चंद्रसूर्ययोः ग्रहणे देवदेवेश कालः समस्तिनावदीनि कुलमूलावतारे सतीर्थे कवि
दुर्यासे तत्तदा मनपर्वाणिः मंत्रदीक्षां प्रकुर्वीणो मासनक्षादीन शोधयेदिति अत्र यद्यपि सूर्यसोम
ग्रहणयोः दीक्षायां समानकालत्वं तथापि ग्रहणप्रशंसकानि वचनानि सूर्यग्रहणपरा
णि वक्ष्येयानि सूर्यग्रहणकाले तु नान्यदन्वेषणं भवेत् सूर्यग्रहणकालेन समो नान्यः कदाच
न तत्र यद्यत्कृतं सर्वमनंतफलदो भवेत् तथा तमासतिथिवारादि शोधनं सूर्यपर्वाणि दद्यादिषं
चग्रहणे यान्तस्मिन्काले गुरोर्नरः सिद्धिर्भवति मंत्रस्य विनायासेन वेगत इति रत्नचिंतामणि
कालिकोद्भवपो सूर्यग्रहणस्यैव विधायकवचने दर्शनात् चंद्रग्रहे तु यादक्ति यावत्त्वरिएग
जनकस्य तु यादीक्षादावि ग्रेसमजन्मानि इति योगिनीतंत्रे चंद्रग्रहणे दीक्षानिषेधवचनदर्श १५

तान भातृकामजनीमंत्रदानविशेषवचनं चेति किंत्वंदम्नर्थयग्रहे तीर्थक्षेत्रक्षेत्रेशिवालये मंत्रमात्रस्य
कथनमुपदेशमकुर्वन इति कालिकोक्तवचनात् मंत्रोनन्तेषु विधिवद्दीक्षितानां प्राप्तपूर्वाभिषि
क्तानां कौलिककार्थमन्यमंत्रग्रहणं चेद्भवति तदा निजगुरोरेव शाक्तमंत्रग्रहणकालेपुपदेश
रूपतो मंत्रग्रहणं दोषमंत्रेति अथैवोविचार्य विहितकालेषु दीक्षादिनात्पूर्वदिवसे शिष्यः
प्रातःस्नातः कृतनित्यकृत्यः समलंकृतः पंचवाष्पेषाय सुवर्णस्वं ब्राह्मणैः कृतस्वस्तिवा
चनः प्रियःसुहृद्भिः सार्द्धंस्वगुरुगृहं गत्वा तं विधिवत्प्रणम्य तदाज्ञया प्राणायामपुरस्स
रं ॐ अद्यामुके मासि अमुकराशिगते सवितर्यमुकपक्षे अमुकतिथौ अमुकगोत्रः ब्रा
ह्मणश्चेदमुकशर्मा क्षत्रियश्चेदमुकवर्मा वैश्यश्चेदमुकवर्मा वैश्यश्चेदमुक ममस्तद्रश्चे
दमुकदासोऽहं चतुर्विधपुरुषार्थसिद्धिकामोऽमुकमंत्रग्रहणं करिष्यामीति कृत शुद्धस्नः
प्राङ्मुखोदङ्मुखो वा संकल्पं विधाय यथोपात्तानवियमस्तादय स्वर्णांगुलीयं कंकणानर
ण स्वर्णयज्ञोपवीतहारकेयूरांगदादिना विधाभरणं चामरोपाणयुगलाशेषतल्पा
भरणपात्राचमनीयाद्यंमधुपर्कादिपात्रविशेषसंपन्नो वरणमासमंत्रीगुरुसन्निधौ निधा

भै॰पा
८०

80

य अद्येत्यादि प्रागवल्लिखित्वान्ते अमुकगोत्रः अमुकशर्माऽहमित्यादि यथासवर्णविहितमम्
न्त्रार्थं अहं वत्वर्विपगुरुपार्श्वस्थितिका मोमुकमन्त्रग्रहणार्थं अमुकवेदान्तर्गतामुकशाखा
ध्यापितममुकशर्माणं त्वामेभिर्यथाशक्तिविहितवरणसाधनैर्गुरुपादयोः प्रणम्य वरु
णमानयोः निवेदयेत् ततो वृतोऽस्मीति गुरुणा प्रतिवचने दत्ते शिष्यः कृताञ्जलिर्यथोचितं
गुरुकर्म त्वं कुरुष्वेति ब्रूयात् ततो गुरुः करवाणीति प्रतिब्रूयात् अत्र मन्त्रग्रहणेति वीर्यं
तु पित्र्यमेवं चैतन्यधामात्ममहत्त्वं च सोऽदत्तकनिष्टस्यैव विपद्ग्राप्नुतेवेति ज्ञानेनायतवचना
दत्ते गुरुत्वेऽस्य गुरुवरणं विधाय तदनन्तरं अद्येत्यादि ब्राह्मणेन वेदवेदाङ्गपारगामन्त्रदावा
स्त्वेष्टदेवतोपासकात् श्रीगुरुचरणेभ्यः सामयोमीलनस्यैव करिष्यन्निगतेन ग्रहणयात् चतु
ऊँडमादेवनारायणवस्त्रनिजः कार्याऽनङ्गीकर्तव्या ततः शिष्यो नैवं ततो गुरुः कृतनित्यक्रि
तः पंचवाद्यघोषपुरस्सरं ब्राह्मणैः सहजनैश्च ततः शिष्येन सह मंडपद्वारं गत्वा प्रागुक्त
विधिना द्वारपूजां विधाय तथैव भूतोत्सादनं पूर्वकं मंडपांतः प्रविश्य तथैव पंचगव्यार्घ
तोयप्रोक्षण पूर्वकं प्रागुक्त वीक्षणादि चतुर्भिः संस्कारैः संस्कृते दण्डपाण्यंतरे वंदनाऽगुरु ८०

कर्तरमपिनेवेदनसर्षपपूर्वीभस्मादतनलाजाद्यस्त्रमंत्रेणसमथाभिमंत्रितानमंडपांतर विकी
र्यास्त्रमंत्रेणकुशगुच्छिनासमार्ज्य मंडपस्य ईशानकोणेसंस्थाप्य ब्राह्मणैपुण्याह वाचकेका
रयित्वा वास्तुपुरुषपूजादिकंविधाय भैरवात्ताधुरस्तरं प्रागवस्थानेवेदिकायामालिख्यसंपूज्य
सपुरतः समसमेभूतलेवेदिकोपरिसर्वतोभद्रमंडलेकुर्यात् तत्रप्राग्यमगापनादक्षिणेनवा
यता समदशरेखा कृत्वा षट्पंचाषड्तत्र शतद्वयकोष्ठयुतंचतुरस्रमंडलंकृत्वा तन्मध्यग
तषट्दिशत्कोष्ठान्येकीकृत्य तद्बहिः चतुर्दिक्षुएकंपंक्तिपरितः समार्ज्यैकेकृत्य पीठंपरिकल्प्य
तद्बहिरपिचतुर्दिगातंपंक्तिद्वयमेकीकृत्य संमार्ज्य वीथीपरिकल्प्य सर्वमध्यगतसरोजस्था
नेबहिः परितोद्वादशांशभागंपरित्यज्य सर्वमध्यावलंबेन समांतरालेसमाद्य तत्रसर्वम
ध्या हृत्कर्णिकायां परिकल्प्य तद्बहिर्गतवृत्तनालमानेन गुरुशुक्ला षोडशाईवृत्तं परि
कल्प्यते वाष्टदलानिकृत्वा ततोपहत्वाद्बहिस्त्यक्तैकांशतो मध्यविद्धावलंबेन हृतांतर
निष्पाद्यगुरोकृष्णवक्त्रापत्रापत्राग्रहाणि विधायैकेकदलमूलेकेशरद्वयं यथादृश्यतेन थाव
रच्यापयंकृत्वा पद्मवद्बहिर्गतेकपंक्तिरूपचतुरस्रपीठस्यकोणचतुष्टयेपि कोष्ठत्रयेण पीठपादा

परिकल्पावशिष्टकोष्ठैरेकीभूतैः पीठगात्राणि विधाय तद्बहिर्गतपंक्तिद्वयकोष्ठानि सम्यक् प्रमा
र्ज्य तद्बहिर्गतपंक्तिसूत्रतर्दिक्षु मध्ये मध्ये कोष्ठद्वयमेकीकृत्य सर्वबाह्यगतपंक्तेरपि दिशि कोष्ठच
तुष्टयमार्जनेन द्वारचतुष्टयं परिकल्प्य द्वारचतुष्टयस्यापि पार्श्वयोः पंक्तिद्वयगतकोष्ठेषु अंतः
पंक्तेः कोष्ठद्वयमिति कोष्ठत्रयं कोष्ठद्वयमेकीकृत्योपशोभां विधाय तत्पार्श्वयोरप्यंतःपंक्तेः को
ष्ठद्वयं बहिः पंक्तेरेककोष्ठमिति कोष्ठत्रयमेकीकृत्योपशोभः परिकल्पावशिष्टैः षड्भिः
षड्भिः कोष्ठैः चत्वारि कोणानि परिकल्पयेदिति सर्वतोभद्रमंडलं निर्माय सरोजकर्णिकाके
सरदलाय पीठवीथीद्वारशोभोपशोभाकोणस्थानानि पंचवर्णैरजोभिः भूषयेत् पंचवर्णर
जांसि तु हरिद्राचूर्णं पीतं रजः तंडुलचूर्णं शुक्लं कुसुंभचूर्णं रक्तं दग्धतंडुलचूर्णं कृष्णं बिल्व
पत्रचूर्णं श्याममिति रजोविन्यासप्रकारस्तु सीमागतः सर्वरेखाः शुक्लाः रजसापकोष्ठ
लीत्येपविस्तारयुक्ता कार्या पीतरजसा कमलकर्णिकां केशरांश्चापूर्य शुक्लरजसा दलानि च
संपूर्य श्यामरजसा दलसंधीनापूरयेत् अथवा कर्णिका पीतेन केशरान्पीतरक्ताभ्यां दलानि
रक्ते दलसंध्यैः कृष्णेन रजसा संपूर्य पीतकृष्णेन वा पीठगर्भमापूर्य पीठपादांस्तु रक्तेन पीठ

81

गात्राणि शुभ्ररजसापूर्य वीथीचतुष्टये कल्पवल्लीपत्रमूलकोरकपुष्पपल्लवफलैर्मण्डितानां
वर्णरजोभिरापूर्य शुभ्रेण रजसा द्वारचतुष्कमापूर्य रक्तवर्णेन द्वारशोभाः पीतेनोपशोभाः
कृष्णेन कोणानि चापूर्य तद्बहिर्वीथ्यामेकैकांगुलान्तरं शुक्लरक्तरजोभिः कर्ण्यादि निःस
र्वतोभद्रमण्डलं विधाय वेदिं परितो दीपान् प्रज्वाल्य प्रागुक्तपूजाद्रव्याण्यासाद्य तथैव ता
निसमुत्तमछत्रचामरद्वयदर्पणव्यंजनव्यजनादि च यथायथं निधाय पूर्ववदिदं वदनस्व
र्वकं करशुद्धितालत्रयप्राणप्रतिष्ठामातृकान्यासयोगपीठन्यासः मूलमन्त्रन्यासप्रागुक्तवि
धिना विधाय मुद्राविरचनध्यानमानसपूजान्तं वैश्वदेव मूलमन्त्रजपतत्समर्पणदेवतास्था
पनात्मपूजनार्हं च वा मूलमन्त्रजपतत्समर्पणं विधाय सर्वतोभद्रमण्डलायतनमहतिगंधा
दिपंचोपचारैः संपूज्य तत्कर्णिकां शालिभिरापूर्य तदुपरि तंडुलान् कुशान् दूर्वा विंश
तिभिः कुशैरेकीकृतान् अविरचितब्रह्मग्रंथिककूर्चं च शालिपुंजोपरि निधापयाय जलेन सं
प्रोक्ष्य तत्र प्रागुक्तविधिना पूजां विधाय तत्र स्वर्णादिभिर्निर्मितं त्रिगुणीकृतसूत्रवेष्टितसर्वांग
वदनं गुरुकर्णेश्वरस्य पदीपितं कुंभं प्रणववमनुच्चरन् संस्थाप्य तत्र पुष्परागनीलवैडूर्यविद्रुमह

क्षीविन्नं प्रागुक्तलक्षणं कूर्चं विधाय तत्र क्षं लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं
ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ॠं ऋं ऊं उं ईं इं आं अं इति विलोममातृकां तेनैव मूल
मंत्रं जपन् आत्मनः कुंभस्य योगपीठस्य चैकस्य भावयन् प्रागुक्तपंचाशदौषधिक्वाथैः रक्तन्यग्रो
डुंबर प्लक्षवटत्वक्क्वाथैः पलाशवल्कलक्वाथैः कर्पूरचंदनकस्तूरी कुंकुमवासितैस्तीर्थजलैर्वा
कुंभमापूर्य प्रपूरितः प्रागुक्तविधिना शंखे संस्थाप्य तत्र उक्त वह्निकलाः सूर्यकलाः सोमक
लाश्चावाह्य पृथक् संपूज्य तासां प्राणप्रतिष्ठां विधाय प्रणवोत्थैकपंचाशत्कलाः प्रागुक्तक
लामातृकान्यासोक्ताः समावाह्य प्रथममकाराद्ब्रह्मणोत्पन्नाः कचवर्गोत्थाः सृष्ट्यादिदशक
लाः संपूज्य ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्यो
मसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहदिति मंत्रमुच्चार्य ॐ ब्रह्मणे नमः इति ब्रह्माणं संपूज्य
सृष्ट्यादिदशकलानां प्राणप्रतिष्ठां विधाय उकाराद्विष्णोरुत्पन्नाः टतवर्गोत्थाः स्थित्यादिदशक
लाः संपूज्य ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणे
ष्वधिक्षियंति भुवनानि विश्वाः ॐ विष्णवे नमः इति विष्णुं संपूज्य प्राग्वज्जरादि दशकलानां प्रा

णप्रतिष्ठां विधाय मकाररुद्रतत्त्वकलामयीं वर्गोत्थाः तीक्ष्णादिदशकलाः संपूज्य ॐ त्र्यंबकं यजा
महे सुगंधिं पुष्टिवर्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॐ रुद्राय नमः इति रु
द्रं संपूज्य तीक्ष्णादीनां प्राणप्रतिष्ठां विधाय ईश्वराधिष्ठितोकारमन्त्रा अकारादि लकारांतपंचाशद्वर्णो
त्थाः पीतादिपंचाशत्कलाः संपूज्य ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं
ॐ ईश्वराय नमः इति संपूज्य पीतादीनां प्राणप्रतिष्ठां विदध्यात् श्रत्रके वित्तचतुर्थमंत्रं गायत्री
मात्र ततो दानात्मसदाशिवाङ्कमन्त्रा स्वरजनितह्रस्वाद्याः षोडशकलाः संपूज्य ॐ विष्णुर्योनिं क
ल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते ॐ सदाशिवाय नमः इति
संपूज्य हृद्यावतरणं वतिदेवतानांशं ते संपूज्य तत्त्वगंधाधिष्ठकमालोक्य सकलकलामयं शंखज
ले ॐ भजले संयोज्य वक्ष्यमाणविधिना पूजयेत् तत्र गंधाष्टकं त्रिविधं शैवशाक्तवैष्णवभेदात्
तत्रादौ शैवगंधाष्टकं जलकाश्मीरकुष्ठबालकचंदनैः तमालागुरुकर्पूरैः पुंसां भवं चाष्टगं
धकं ह्रीवेरचंदनंकुष्ठमगुरुंकुंकुमंमरु सेव्यकं वज्रमांमांसी वैष्णवं तद् उदारितं चंदनागुरुक
र्पूरचोरकुंकुमरोचना जटामांसीकपियुताशक्तेः गंधाष्टकं विदुः २ जलेवालत्वं काश्मीरं कुंकुमं

ह्रीवेरं वालकं मेघ्यकं मसीरं १ चोरः प्रसिद्धः कशिभूकं सिल्हारसप्रसिद्धः ततोऽश्वत्थपर्णैः आम्र
पल्लवानि दूर्वा रक्तणिलज्जया संवेष्ट्य कल्पवृक्षतया संवेष्ट्य कल्पवृक्षधिया कलशोपरि निधाय
तदुपरि कलशजातीयं कलशजातीय तंडुलपूर्णे नारिकेलफलयुक्तं कल्पवृक्षफलतया पात्रं
संस्थाप्य पटवस्त्रयुगेन तद्वदं संवेष्ट्य तत्र प्रागुक्त प्रकारेणामूलेन मूर्तिं परिकल्प्य तत्र देवमावा
ह्य प्रागुक्तविधिना षोडशोपचारैः सांगं सावरणं देवं संपूज्य विधाय दक्षिणभागे हस्तमात्रायामवि
स्तारमेखलात्रयपर्वमात्रोच्चवालकाभिः समंचतुरस्रं स्थंडिलं कृत्वा तत्र प्राग्वन्नित्यहोमोक्तविधिना
वह्निं संस्थाप्य तत्र देवमावाह्य नित्यहोमोक्तविधिना हुत्वा पुनर्देवं संपूज्य ॐ भस्त्र मूर्त्तौ देवं विसृज्य
तथैव वह्निं संपूज्य विसृज्य प्रागुक्तविधिना सर्वभूतबलिं दत्वाऽन्यदेवतापदेन तत्कल्पोक्तविधिना
सर्वभूतबलिं दत्वा अन्यदेवतापदेन तत्कल्पोक्तविधिना बलिदानं विधाय देवयोत्तरापोशा
नादि नीराजनांतं नित्यपूजोक्तविधिना विधाय मूलमंत्रप्राणायामं ऋष्यादिन्यासपूर्वकं अ
ष्टोत्तरसहस्रं जपित्वा देवाय जपं समर्प्य पूर्वमंडपस्यैशानकोणे स्थापित विकिरपुंजोपरि स्व
र्णगर्भवस्त्रयुग्मवेष्टितं जलपूरितं करकं विन्यस्य तत्रास्त्रदेवतां सिंहारूढां दक्षिणवामक

रयोः खड्गखेटकधारिणीं घोररूपां पश्चिमाभिमुखीं ध्यात्वा तिष्ठन्तीं धूपादिपंचोपचारैः संपूज्य
नमस्कृत्य करकं कराभ्यामुद्धृत्य मंडपाभ्यंतरे प्रदक्षिणं भ्रमणं तन्नाले मोदकपात्रे सिंच्य
शंभोर्लोकपालानां चास्त्रयामास शिष्यं रक्षरक्षेति वदन् प्रदक्षिणं परिक्रम्य तं करकं स्वस्थाने
निवेश्योपविश्य अस्त्रमंत्रेणाहुतं त्वामस्त्रदेवतां पंचोपचारैः संपूज्य ततः प्रागुक्तेषु कुंडेषु गुरु
र्वाम्यकुंडे वक्ष्यमाणविधिनाग्निं संस्कृत्य नूतनेपात्रादिपात्रमस्त्रमंत्रेण प्रक्षाल्य तत्र मूलमंत्रेणाष्ट
धाभिमंत्रितान् पंचदशप्रसृतिमितानस्त्रमंत्रं जपन् निक्षिप्य तत्र गोदुग्धं यावत्तत्सृतं भवति॥
तावन्निक्षिप्य प्रक्षालितपात्रे कवचमंत्रमुच्चरन् तमावदने विधाय मूलमंत्रं स्मरन् प्राङ्मुखो
गुरुश्चरुं पक्त्वा तस्मिन् सिद्धे मूलमंत्रेण तस्मा चरुमवतार्य्यास्त्रमंत्रेणाभिमंत्रिते कुशास्तरे निधा·
य त्रिधा विभज्यैकं भागं देवताय निवेद्य द्वितीयं भागं मूलमंत्रेण हुत्वा तृतीयभागं शिष्येन सह
गुरुर्भुक्त्वा गुरुः स्वयमाचांतः स्वाचांताय शिष्याय षडंगन्यासयोगेन सकलीकृताय प्रादेश
मात्रं यथोक्तं दंतकाष्ठं हृन्मंत्रेणाष्टधाभिमंत्रितं दद्यात् शिष्योपि दंतधावनं विधाय दंतकाष्ठं
प्रक्षाल्य पुरतः पतितमाचम्य गुरोः समीपं गच्छेत् ततो गुरुः शिष्यशिखाबंधनेन मूलमंत्राभिमंत्रि

तेन शिष्यं संरक्ष्य तेन सार्द्धं तस्यां वेद्यां कुशास्तरणे तामसीं शयनं कुर्यादित्यधिवासः इति श्रीवघेलकुल
कमलप्रद्योतनप्रचंडमार्तंड श्रीमहाराजकुमारश्रीजैत्रसिंहदेवविरचिते श्रीभैरवाचार्यज्ञाने एका
दशलवः ११ ॐ ईं गोमयोपलिप्ते वह्निस्थापनं कुर्यात् तत्रादौ ॐ ईं समीपे गुरुः प्राक् नित्यपूजोक्त
विधिना स्नात्वा आसने पूजार्थं विलिप्य आसनात् नम्य पूजाद्यर्घ्यस्थापनान्तं पूजां नीं विधाय ॐ ईं मूलमंत्रेण
मृदा सुमंत्रेण प्रोक्ष्य अस्त्रमंत्रेण ॐ ईं मध्ये किंचित्खननं कृत्वा अस्त्रमंत्रेण तत्र दर्भमुष्टिनाभिका
भ्यां तत्र हृत्य बहिस्त्यक्त्वा हृन्मंत्रेण सुवृत्तमृत्तिकया खातं स्थानमापूर्य अस्त्रमंत्रेण समीकृत्य कवच
मंत्रेण जले संसिच्य अस्त्रमंत्रेण काष्ठादिना कुहर विना हस्तीकृत्य कवचमंत्रेण कुशैः ॐ ईं मध्यं
समार्ज्य कवचेनैव गोमयद्भिः संलिप्य कवचेनैवाग्निसोमात्मकाष्टात्रिंशत्कलारूपं संचिंत्य कव
चेनैव मेखलात्रये पवित्रसूत्रीकृत्य सूत्रेण प्रतिमेखलं विशिष्टं संवेष्ट्य गं अस्मककुंडाय एतदासनं न
मः अस्मककुंडाय एषोऽर्घ्यः स्वाहा इत्यादि प्राग्युक्ता आसनादिदीपान्तैरुपचारैः प्रणववर्णत्रयस्थादि
तत्तत् ॐ ईं नाम चतुर्थीनमोन्तेन संपूज्य तथैव नाभिं च संपूज्य मेखलात्रयं हृन्मंत्रेण तथैव संपू
ज्य अस्त्रेण ॐ ईं वज्रवत्तदर्भैः संवितानहृन्मंत्रेण कुशैः ॐ ईं स्वचतुर्दिक्षु वज्रैः ज्वालविनाशाय चतुः पंच

मार्गचतुष्टयं परिकल्प्य कवचमन्त्रेणाच्छिन्नाग्रैः कुशैरस्त्रमन्त्राभिमन्त्रितैः ॐ उभिस्त्रिगुणं सर्वमाच्छादयन्
अच्छपट्टेन विदध्यादित्यष्टादश संस्कारान्कुर्यात् प्रथमोदितैस्तु तैर्भिरेव संस्कारैः ॐ उं संस्कृत्य तत्र हु
न्मन्त्रेणास्त्रमन्त्रेणवा दक्षिणे मध्योत्तरेषु प्रागग्रा पश्चिममध्यमपूर्वेषु उदगग्रा इति तिस्रः तिस्रो रेखाः
कुशमूलेन विलिख्य प्रणवेनाभ्युक्ष्य प्रागग्रासु रेखासु दक्षिणरेखायां विष्णवे नमः मध्यरेखायां रुद्रा
य नमः उत्तररेखायां ईशाय नमः उदगग्रासु रेखासु पश्चिमरेखायां ब्रह्मणे नमः मध्यरेखायां
यमाय यमाय नमः पूर्वरेखायां सोमाय नमः इति संपूज्य तत्र प्रागुक्तयोगपीठपूजाक्रमेण मन्त्रकादि
परतत्त्वान्तं योगपीठं संपूज्य तत्केसरेषु ब्राह्म्यादि प्रादक्षिण्येन मध्यान्ते ॐ जयायै नमः विजया
यै नमः अजितायै नमः अपराजितायै नमः नित्यायै दोग्ध्र्यै विलासिन्यै अघोरायै मङ्गलायै
इति संपूज्य श्रीं ह्रीं सर्वशक्तिकमलासनाय नमः इति मध्ये पुष्पाञ्जलिं निक्षिप्य तत्र भुवनेश्वरीतन्म
न्त्रेण वाह्यावाहनादि परमीकरणान्तं तत्तन्मुद्राविधायाशनादि षोडशोपचारैः संपूज्य श्री
भैरवं ध्यात्वा मूलमन्त्रेण तथैव तं संपूज्य देवीमस्मत्स्वात्मानं देवं च कामोन्नतो विचिन्त्य स्वर्णादिपा
त्रेण मस्तापात्रेण मस्तापात्रेचेन्नतनेन सूर्यकान्तादिमणिं वा श्रोत्रियद्विजगृहाद्वाग्निमानीय तन्मध्यात्

ग
प
८५

85

स्त्रमंत्रेणोक्तमंगमर्कं त्र्यादीशानेऽन्तकोणेषु विन्यस्य देवीं शंभुलेन समुपरतः संस्थाप्य मूलमंत्रेणवेत्य अ
स्त्रमंत्रेण शोद्य अस्त्रेण ऊं शेष्मं नाम्न कवचेनाभ्युक्ष्य तत्र मूलाधारस्थवह्निमंडलमध्यगत परमात्म
स्वरूपाद्ग्रीषामात्मकविंदोस्तकाशाद्वह्निमणिपूरणगात जठरानलेन सह सुषुम्णावहन्नासापु
टाधनानिष्क्रास्य रमितिवह्निबीजमुच्चरन्नुच्चरन्तः पात्रस्थितवह्नौ बहिस्थितन्तं संयोज्य क्रोदर्यवाज्य पणार्थं
व वह्निनामैकं विभावयन् प्रणवेनाभिमंत्र्य वमितिधेनुमुद्रयामृतीकृत्य अस्त्रमंत्रेण संरक्ष्य कवचमंत्रेणावगुं
ठ्य ऊं वैश्वानराय नमः इति गंधादिभिः संपूज्य जानुभ्यां धरणीं गतः तत्पात्रं कराभ्यामादाय कुंडस्योपरि प्रदक्षि
णं परिभ्राम्य देव्या योनौ शिवबीजमिति ध्यायन् स्वाभिमुखं कुंडमध्ये प्रणवमुच्चरन् तमग्निं निदि
ध्यात्मेपथ्यनात्तदीयादेवदेव्योराचमनं दद्यात् ऊं चित्पिंगल हन हन पच पच दह दह सर्वज्ञाज्ञापय
स्वाहा इति मंत्रमुच्चरन् मयूरकुक्कुटमारुतगैरग्निप्रज्वाल्य काष्ठैः पद्मासनकृतांजलिर्लिखेत् ओं अग्निं
प्रज्वालितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं समिद्धं सर्वतोमुखं इति ज्वलंतमग्निं उपस्थायोप
विश्य वक्ष्यमाणवह्निमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भृगुऋषये नमः मुखे गायत्रीछंदसे नमः
हृदये अग्निदेवतायै नमः गुह्ये रं बीजाय नमः पादयोः स्वाहाशक्तये नमः इति विन्यस्य दीक्षाहोमे

विनियोगः इति कृताञ्जलिर्वदेत् लिङ्गे ॐ सं हिरण्याय नमः गुह्ये ॐ कं गगनाय नमः शिरसि ॐ रं रक्तायै
नमः मुखे ॐ कृष्णायै नमः मनसि ॐ सुप्रभायै नमः नेत्रयोः ॐ बहुरूपायै नमः ॐ अतिरक्तायै नमः
इति सप्तजिह्वाविन्यासः ॐ सहस्रार्चिषे हृदयाय नमः ॐ स्वस्तिपूर्णाय शिरसे स्वाहा ॐ उत्तिष्ठपुरुषा
य शिखायै वषट् ॐ धूमव्यापिने कवचाय हुं ॐ सप्तजिह्वाय नेत्रत्रयाय वौषट् ॐ धनुर्धराय अस्त्राय फ
ट् इति षडङ्गमन्त्राणां गुह्यादिकर तलान्तं करयोर्विन्यस्य हृदयादिषडङ्गेष्वपि न्यसेत् ततः शिरसि ॐ अ
ग्नये जातवेदसे नमः वामांसे ॐ अग्नये सप्तजिह्वाय नमः वामपार्श्वे ॐ अग्नये हव्यवाहनाय नमः वा
मकट्यां ॐ अग्नये अश्वोदरजाय नमः लिङ्गे ॐ अग्नये वैश्वानराय नमः दक्षिणकट्यां ॐ अग्नये कौमारते
जसे नमः दक्षिणपार्श्वे ॐ अग्नये विश्वमुखाय नमः दक्षिणांसे ॐ अग्नये देवमुखाय नमः इति विन्या
स्य वक्ष्यमाणवह्निरूपं स्वात्मानं ध्यायन् सप्तजिह्वां सर्वदा वषा ॐ उत्तरभागे कुशाकारे शुक्र स्रु
वौ प्रणीतापात्रे आज्यस्थाली चरुहोमे चरुस्थाली परिधिद्वय समीपञ्च कामकमिध्मं स्थलेन मृत्
मयदीर्घकुशान् इति पात्राण्येकैकशोऽन्यानि सम्यगासाद्य पिहोमद्रव्यं दध्यक्षतादि पुष्पाणि गं
धपुष्पादि पूजाद्रव्याणि च यथा पश्चिमेस्थाप्याधोमुखानि स्रुक्स्रुवादीनि तिस्रः पवित्राधो मुखान्

सेकद्रूपनोत्तरपूर्वकमन्त्रामीकृत्य प्रणीतापात्रं प्रक्षाल्य स्वपुरतः कुशास्तरे निधाय शुद्धजलेनापूर्य तद्गंधा
क्षतानि निक्षिप्य प्रादेशमात्रं साग्रं कुशाद्वयं मध्यग्रंथियुतं जलमध्ये निधाय करद्वयानामिकांगुष्ठाभ्यां प
वित्रमूलाग्रे विधृत्यास्त्रमंत्रं हृन्मंत्रं चोच्चरन् पवित्रमध्येन जलेनापात्राद्बहिः त्रिवारं भूमौ निक्षिपेदिति सवनं विधा
यतन्मध्ये किंचिद्दूर्वां निक्षिप्य तत्पात्रं कराभ्यां नासिकासमं कृत्वा कुंडस्योत्तरभागे कुशास्तरे निधाय तद
परि प्रागग्रान्दर्भान्निक्षिपेदिति प्रणीतापात्रं संस्थाप्य प्रोक्षणीपात्रं प्रक्षाल्य शुद्धजलेनापूर्य तन्मध्ये
प्रणीतापात्रजलेनापात्रांतरेण स्पृष्ट्वा किंचिद्दत्तेन जलेन मूलमंत्रेण सर्वाणि पात्राणि होमद्रव्याणि
च प्रोक्षयेदिति इध्मासादनविधाय प्रोक्षणीजलेनाग्निं मूलमंत्रेण परिषिंच्य गर्तैस्तुत्रिभिर्दर्भैः
प्राचीदिशि समभ्यभ्य शाखाभ्यां तत्प्राग्रैरीशानादिनैर्ऋत्यंतं परिस्तीर्य पुनर्दक्षिणस्यां प्रागग्रैः पूर्वं परि
स्तरणमूलमाच्छादयन्नग्नेः पुनः पश्चिमायामुत्तराग्रैर्दक्षिणपरिस्तरणमूलं मूलेनाच्छादयन् पुनः
उत्तरस्यां प्रागग्रैः पश्चिमपरिस्तरणाग्रं मूलेन पूर्वपरिस्तरणाग्रमग्रेण चाच्छादयन् परिस्तीर्य परिधि
त्रयमादाय सर्वतः स्थूलं पश्चिमे उत्तराग्रं ततः कनिष्ठं दक्षिणे पूर्वाग्रं पश्चिमपरिधेर्मूले परिधिमूलं
यथा भवति तथा पुनस्तस्मादपि कनिष्ठं उत्तरस्यां पूर्वाग्रं पश्चिमपरिधेरग्रापरिस्थं मूलमिति कुंड

स्पमध्यमेखलोपरिस्थापयित्स्तरणेपरिधित्रयंनिक्षिपेत् अथपश्चिममेखलायांतपरिस्तरणेपरिधिस्थापनं सो
त्तिनालत्तृतीयमेखलोरंतरालेकार्यमिति नालमेखलयोर्मध्येपरिधिस्थापनमाचरंप्रकुर्यात् तथाहि
विह्नमध्यमामेखलो परीतिसारसंग्रहवचनात् ततः पश्चिमपरिधौ ॐब्रह्मणेनमः दक्षिणपरिधौ
ॐविष्णवेनमः उत्तरपरिधौ ॐरुद्रायनमः इतिसंपूज्य वह्निमंत्रेणप्रागुक्तपरिधौपाद्याद्याचमनीय मधु
पर्कपात्राणिसंस्थाप्य सकुंडमध्येषट्कोणगर्भितंसकेशरं चतुर्द्वारयुक्तचतुरस्रवेष्टितमष्टदलकम
लकमलेवह्नेःपूजापीठं विभाव्य तत्रप्रागुक्तविधिनामंडूकादितत्त्वान्तांतयोगपीठंसंपूज्याष्ट दलकेसरे
षुस्वाग्रादिशादक्षिणेन मध्यांते ॐपीतायैनमः ॐश्वेतायै॰ अरुणायै॰ कृष्णायै॰ धूम्रायै॰ तीव्रायै॰
विस्फुलिंगिन्यै॰ रुचिरायै॰ ज्वालिन्यै इतिनवशक्तिःसंपूज्य रंसर्वशक्तिकमलासनाय नमइति
समस्तपीठंसंपूज्य तन्मध्येकैरवैरं स्वस्तिकशक्तिभीतिर्दधानमंभोजगतंत्रिनेत्रंसिंहस्वर्णतपनीय
भूषंवह्निंजटाभूषितमौलिमीडे इमयिंध्यात्वा सप्तजिह्वामहोग्रदर्प ॐ वैश्वानरजातवेदइहावह
लोहिताक्षसर्वकार्याणि साधयस्वाहा अग्नयेनमइत्यग्निं पुष्पांजलिनापुनर्वह्निमंत्रमुच्चार्य
अग्नयेपतदासनंनमः पुनर्वह्निमंत्रं अग्नयेएषतेर्घस्वाहा एवंएतत्पाद्यंनमः एतत्आचमनीयंस्व

पा एतत्ते मधुपर्कः स्वधा एतत्ते आचमनीयं स्वधा एतत्ते स्नानं नमः इति शिवस्तुवरणम्भक्रमस्यादि सर्वांगोद्देशेन
मेखलया बहिः पात्रांतरेण पाद्यादिस्नानांतानुपचारान्वह्नेः ततः दर्भगंधावतया परिकल्प्य पुनराचमनीयं दत्त्वा
वस्त्रावेष्टवस्त्रं दत्त्वा पुनर्वह्नेराचमनीयं दत्त्वा यज्ञोपवीतं निवेद्य बहिः पुनराचमनीयं दत्त्वा गंधपुष्पधूपव
द्वादिवितानं वेदयेदिति वह्निमंत्रेणाग्नेयक परिपाद्यं वाधिवासनादि पुष्पतानुपचारानुपचार्य षट्कोणे
षु देवाय कोणमारभ्य ॐ ह्रूं हिरण्यायै नमः ह्रूं गगनाय नमः ह्रूं रक्तायै ह्रूं कृष्णायै नमः ह्रूं सुप्रभा
यै रं ह्रूं बहुरूपायै ह्रूं अतिरक्तायै इति सप्तजिह्वां संपूज्य षट्दलकेसरेषु अग्नीशानासुरवायव्यदेवाग्रत
तदादिवत् तद्दिक्षु च ॐ सहस्रार्चिषे हृदयाय नमः स्वस्तिपूर्णाय शिरसे नमः ॐ उत्तिष्ठपुरुषाय शिखा
यै धूमव्यापिने कवचाय सप्तजिह्वाय नेत्राय नमः धनुर्धराय अस्त्राय फट् इति षडंगानि संपूज्याष्टदले
षु देवाय दलमारभ्य ॐ अग्नये जातवेदसे नमः ॐ अग्नये सप्तजिह्वाय अग्नये हव्यवाहनाय अग्नये अ
श्वोदरजाय अग्नये वैश्वानराय अग्नये कौमारतेजसे अग्नये विश्वमुखाय अग्नये अश्वोदरजाय अग्नये वै
श्वानराय अग्नये कौमारतेजसे अग्नये विश्वमुखाय अग्नये देवमुखाय इति प्रादक्षिण्येनाष्टौ मूर्तीः संपू
ज्य तद्बहिर्वज्रादीनिंद्रादीन् तदायुधानि च संपूज्य पुनर्वह्निमंत्रेण वह्निं संपूज्य धूपदीपादि दत्त्वा

87

नैवेद्यमन्नस्याग्नावेव निक्षिप्य आचमनीयं दत्वा तांबूलं चवह्नावेव निवेद्याग्निं प्रणम्य स्रुक्स्रुवावादाय
योग्यौ तावग्नौ प्रताप्य कुशानन्तर्हिता तयोरग्रं कुशाग्रैर्मध्यं मध्येन मूलं मूलेनेति त्रिः संमार्ज्य पुनरपि योग्
यौ तौ प्रताप्य वामकरेणादाय प्रोक्षणीजलेन दक्षिणकराग्रेण प्रोक्ष्य पुनरपि प्राग्वत्संतप्य कुशा
नग्नौ प्रक्षिप्य स्रुक्स्रुवौ दक्षिणभागे निधाय स्थालीमादायास्त्रमंत्रेण प्रक्षाल्य स्वपुरतः कुशास्त
रेण निधाय तदुपरि दर्भाग्रं प्रादेशमात्रं साग्रं मध्ये ब्रह्मग्रंथियुतं कुशद्वयरूपं पवित्रं निधाय पार्वतीव
स्वेषु डङ्गोपूतं तण्डुलादिहस्वपरहितं वीक्षणादि चतुःसंस्कारैः संस्कृतमाज्यं स्थाल्यां निक्षिप्य कुंड
स्यवायव्यकोणे कुंडादङ्गारानाहृत्य मेखलायाः बहिः भूमौ निक्षिप्य तेषामाज्यस्थालीं हृन्मंत्रे
ण निधाय कुशद्वयं प्रज्वाल्य हृन्मंत्रेणाज्ये निक्षिप्य शेषमग्नौ निवेश्य पुनर्द्वितीयं प्रज्वाल्य कवच
मंत्रेणाज्यस्थालीपरितः परिभ्राम्य दग्धशेषमग्नौ निक्षिप्य पुनः कुशान् प्रज्वाल्य हृन्मंत्रेणाज्ये प्रद
र्श्य दग्धशेषं वह्नौ निक्षिप्य आज्यस्थालीमन्तरप्रादक्षिण्येन कुंडपरितो भ्रामयित्वानीय स्वपु
रतः कुशास्तरेण निधाय वायव्याङ्गारान् कुंडमध्ये निक्षिप्याथ संस्मरन् अंगुष्ठानामिकाभ्यां करद्व
येन पवित्रमूलाग्रे धृत्वास्त्रमंत्रमुच्चरन् पवित्रमध्येनाग्नौ मन्तस्थानाद्धृन्मंत्रमुच्चरन् तथैव पवित्रमध्ये

नत्वाभिमतं चूर्णैरिः संस्नाप्य तत्राभिन्नमाज्यस्थाल्यां प्रागग्रे मध्ये निवेश्य भागद्वयं कृत्वा दक्षिणभागं शुक्ल
पक्षे परिकल्प्य पुनस्तत्रैव वामभागे कृष्णं दक्षिणे पिंगलां मध्ये सुषुम्णामिति नाडीसंवितं स्रुवेण द
क्षिणभागादाज्यं मंत्रेणाज्यमादाय ॐ अग्नये स्वाहा इति वह्नेर्दक्षिणलोचने हुत्वा इदमग्नये न मम इत्युद्देशे
त्यागं विधाय पुनः हृदयमंत्रेण वामभागादाज्यं गृहीत्वा ॐ सोमाय स्वाहा इति वह्नेर्वामलोचने हुत्वा ॥
सोमायेदं न मम इत्युद्देशत्यागं विधाय पुनः हृन्मध्यादाज्यं गृहीत्वा ॐ अग्नीषोमाभ्यां स्वाहा इति वह्नेः
ललाटलोचने हुत्वा अग्नीषोमाभ्यामिदं न मम इत्युद्देशत्यागं विधाय पुनर्दक्षिणभागादाज्यं गृ
हीत्वा ॐ अग्नये स्विष्टकृते स्वाहा इति वह्नेर्वक्त्रे हुत्वा अग्नये स्विष्टकृते स्वाहा इति वह्नेर्वक्त्रे हुत्वा अग्न
ये स्विष्टकृत इदं न मम इत्युद्देशत्यागं विधाय ॐ भूर्भुवः स्वः स्वाहा प्रजापतये इदं न मम ॐ वैश्वानर जात
वेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा इति वह्निमंत्रेण वारत्रयं हुत्वा इदमग्नये न मम इ
त्युद्देशत्यागं कृत्वा ॐ अग्नेर्गर्भाधानं संपादयामि स्वाहा ॐ अग्नये पुंसवनं संपादयामि स्वाहा
ॐ अग्नेः सीमन्तोन्नयनं संपादयामि स्वाहा ॐ अग्नेः प्रतिकर्म आज्याहुत्येकं हुत्वा वागीश्वरीजातं वह्निं
प्राग्वत् संपूज्य ध्यायन् ॐ अग्नेर्जातकर्म संपादयामि स्वाहा इति पञ्चवाहुतीर्हुत्वा वह्नेर्नालच्छेदं कृत्वा सू

नकेसे शोध्य ॐ वह्नेर्नामकरणं संपादयामि स्वाहा इत्यष्टावाहुतीर्हुत्वा नेशिवाग्निरिति तस्य नाम कृ
त्वा दिक्षु वह्नेः पितरौ संपूज्य ॐ वह्नेरुपनिष्क्रमणं संपादयामि स्वाहा ॐ अग्नेरन्नप्राशनं संपादयामि
स्वाहा ॐ अग्नेः चौलं संपादयामि स्वाहा ॐ अग्नेरुपनयनं संपादयामि स्वाहा ॐ अग्नेर्महानाम्नं संपादया
मि स्वाहा ॐ अग्नेर्महाव्रतं संपादयामि स्वाहा ॐ अग्नेरुपषदं संपादयामि स्वाहा ॐ अग्नेर्गोदानं संपाद
यामि स्वाहा ॐ अग्नेः समावर्तनं संपादयामि स्वाहा ॐ अग्नेरुद्वाहं संपादयामि स्वाहा इति शतिकर्मा
ष्टाहुतीर्दत्वा अग्नेर्गर्भाधानाद्युद्वाहान्तान्संस्कारान्विधाय वह्नेः पितरौ देवदेव्यौ भगवन्तौ संपूज्य विसृज्य ॥
मूलाग्नेः सुवेणसंसिक्ता पंचसमिध लक्ष्मीमेकदेवांजलिना वह्नौ समर्प्य ॐ ह्रां हिरण्यायै स्वाहा
घूं गगनायै भ्रूं रक्तायै हूं कृष्णायै लं रक्तायै सं बहुरूपायै छ्रूं अतिरक्तायै ॐ सहस्रार्चिर्हृद
याय स्वाहा ॐ स्वस्तिपूर्णाय स्वाहा शिरसे स्वाहा इति नमरूपाय शिखाय स्वाहा ॐ भूमव्यापिने
कवचाय स्वाहा ॐ सप्तजिह्वाय नेत्राय स्वाहा ॐ धनुर्धरायास्त्राय स्वाहा ॐ अग्नये सप्तजिह्वाय
अग्नये हव्यवाहनाय अग्नये अश्वोदराय अग्नये वैश्वानराय अग्नये कौमारतेजसे स्वाहा अग्नये
विश्वमुखाय अग्नये देवमुखाय इति जिह्वाङ्गमूर्तिमन्त्रैरेकामाहुतिं हुत्वा सर्वत्र भगवन्तं ततन्नाम्नोदर

भै॰ पा
८५

89

सांगं च कुर्यात् ततः स्रुवेणाज्यमादाय स्रुचि चतुर्वारं निधाय अधोमुखं स्रुक् स्रुवौ मुखे निधायोत्था
य शास्त्रोक्तवह्निमंत्रमुच्चार्य वौषडिति श्रौतिकान्तं स्रुक्स्रुवौ प्रविश्य ॐ स्वाहा ॐ श्रीं स्वाहा ॐ ह्रीं स्वाहा
ॐ ह्रीं क्लीं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये स्वाहा
ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद स्वाहा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे स्वाहा ॐ
श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा इति दशधा विभक्तेन महागण
पतिमंत्रेण दशाहुतिं हुत्वा ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा इति
समस्तेन गणपतिमंत्रेण चतुर्वारमाज्येन जुहुयात् इत्यग्निस्थापनविधिः अतः परं चक्रयोक्तसम
प्रदायशक्तिमेव पूजाचक्रं विभाव्य तत्र शास्त्रोक्तविधिना मंडूकादिपीठमंत्रांतयोगपीठं संपूज्य ॥
तत्र भगवत्देवमावाह्य शास्त्रोक्तविधिना सांगं सावरणं सर्वोपचारैः पूजयेत् अत्रार्घ्यादिस्नानांता
नुपचारानाग्निपूजावद्देवस्यं दद्यात् ततः पात्रांतरे देवस्य हविः प्रकल्पयेत् अग्नौ तत्संवेशं तु मध्यमे वा कल्पये
दिति ततो मूलमंत्रेण वह्निदेवतयोर्वक्त्रैकीकरणार्थं चावेशनात्माहुतिं हुत्वा स्वात्माग्निदेवता
नामैक्यं भावयेत् मूलेन नाडीसंधानार्थमेकादशवारं घृतेन हुत्वा षडंगावरणदेवतानां नित्यहोमो ८५

क्तविधिनैकैकामाहुतिं हुत्वाशेन मूलमंत्रेण पंचविंशतिं हुत्वा प्रागादिदिकस्थाष्टसु कुंडेषु ऋत्वि
ग्भिः प्रागुक्तविधिनाष्टादशसंस्कारैः संस्कृतेषु गुरुः स्वकुंडादग्निसमुद्धृतोद्धृतः निक्षिप्य ऋत्विज
श्च स्वस्वकुंडे वह्निं परिषिंचेन परिस्तरणपरिधिप्रदेपनपूजादिभिः सम्यक परितोषत्समिद्धेस
स्मिन्स्वेष्टदेवतानिसपूज्योक्तविधिनावाहनासनपूजादितांबूलांतैरुपचारैः सम्यक संपूज्य वह्नेकीक
रणेनाडीसंधानांगावरणहोमांते मूलमंत्रेण गुरुणाविभक्तदेतेन घृतमिश्रेण पायसेन पंचविंश
तिं धाहुत्वा वाद्येण सह यथोक्तमधिवासनकर्मशेषं शयनांतं विदध्युरिति ततो गुरुः सशिष्यः
स्नानकृत्याय कृतप्राह्निकस्मितचरोस्तृतीयांशं नवपात्रविभक्तकांककृियः शिष्याय प्रदिशमा
त्रेयथोक्तंदंतकाष्ठंमूलमंत्रेणसमाभिमंत्रितं दत्वादंतधावनंकारयेत् शिष्योऽपितेन प्रागुक्तंदंतधा
वने मंत्रं स्मरन् दंतान्विशोध्य दंतकाष्ठं प्रक्षाल्य पुरतश्चतुरस्रेहस्तमात्रे स्थंडिले त्यजेत् ततो
गुरुः तत्परीक्षां कुर्वीत तत्र शुभाशुभफलानि सारसंग्रहे ईशानाग्रे ज्ञानलाभ प्रागग्रे भूति
स्तत्रमा आग्नेयाग्रे मनस्तापो वंधनाश दक्षिणे राक्षसाग्रे मृत्युभयं वारुणाग्रे मनःसुखं
वायव्याग्रेमृत्युनाशः कौवेराग्रेसुखावहं इति ततः स्वप्नपरीक्षां कुर्वीत ज्ञलप्रकाशतंत्रे क्रु

भैरा
९०

रक्तमेषमादीन्नात्यक्रूरेमध्यमाभवेत उत्तमस्वप्नपूर्वातुदीक्षासर्वोत्तमामताइति तत्रदंतकाष्ठेस्वप्नेमंगल
दिगग्रपातेदुःस्वप्नदर्शनेचप्रायश्चित्तमाह मातसेयहृपव अमंगलस्थानपातेप्रायश्चित्तंसमाचरेत
इतिप्राक्प्रदर्शितप्रकरणेदुःस्वप्नदर्शनजन्यदोषनिवृत्त्यर्थंयत प्रायश्चित्तमुक्तमेवात्राप्याचरणीय
मिति ततःशिष्योपवासतः कृतपूर्वाह्निकक्रियः समलंकृत्वा श्रीगुरुंप्रणम्य तदाज्ञयातत्पार्श्वेउप
विशेत ततोगुरुःस्वस्तिकस्थकुंडेतथैवदेवंसांगंसावरणंसांगंसंपूज्य सघृतैस्तिलैस्तत्कल्पेषुप्र
स्रुवेणहोमोक्तहूवैवाष्टोत्तरसहस्रंअष्टोत्तरशतंवाजुहुयुः ततोगुरुःशिष्यंपंचगव्यंपाययित्वा
कुंडसमीपंनीत्वा दिव्यदृष्ट्यावलोक्य तस्यहृदयारविंदाज्जीवात्मानंभूतशुद्ध्युक्तपरिपाट्यातदेहा
नाडीमार्गेणनिस्सार्य स्वात्मनियोगबलेनगुरुःक्रमयुक्त्यासंयोज्य शिष्यस्यषडध्वशोधनंकुर्यात॥
तत्रशिष्यस्यपादयोः कलाध्यानंनिवृत्तिप्रतिष्ठाविद्याशांतिः शांत्यतीताचेतिपंचकलात्मकंसंवि
त्य ततस्तस्यलिंगप्रदेशेशिवशक्तीश्वरसदाशिवशुद्धविद्यामायाकालनियति कलाविद्यारा
गपुरुषप्रकृति बुद्ध्यहंकारमनःश्रोत्रत्वक चक्षुर्जिह्वाघ्राण वाकपाणिपादपायूपस्थशब्दस्प
र्शरूपरसगंधाकाशवायुवह्निजलपृथिव्यात्मकषट्त्रिंशत्तत्त्वरूपंशैवंतत्त्वाध्वानंध्यायेत इतिशिव

९०

दीक्षायां वैष्णवदीक्षायां त जीवप्राणः धियस्त्वर्मनश्चेंद्रियदशकं कलान्मात्रा भूतानां पंचकमपि हृत्संस्थंतेज
सोत्रयं तदमसृष्ट्यात्रु वासुदेवप्रभवात्मत्वात्तदुपविष्टा इंद्रियदशकं प्राणत्वक्श्रोत्रयोर्वागादयश्च तन्मा
त्राशब्दादयः भूतपंचकमाकाशादि तेजःसोत्रयं सोमसूर्याग्निमयं वासुदेवप्रभवाः वासुदेवसंक
र्षणप्रद्युम्नानिरुद्धाश्चत्वारः सौरभदीक्षायां त भूततन्मात्रेंद्रियाणि मनो गर्वश्चार्थास्तथा प्रधानं चे
ति गर्वोऽहंकारः प्रधानं पुरुषं तत्त्वं शक्तिदीक्षायां त आत्मविद्याशिवाख्येति विपरीतास्तु एव च सर्वं
तत्त्वं चेति विपरीत शिवविद्यात्मा इति क्रमेण तत एव आत्मविद्याशिवाख्य इति दश तत्त्वानि इत्थं त
त्तद्दीक्षायां तत्तद्ध्याने चिंतयेदिति ततः शिष्यस्य नाभौ अतल वितल सुतल महातल रसात
ल पाताल भूर्भुवः स्वः महः जनः तपः सत्यलोकात्मक चतुर्दश भुवनरूपं भुवनाध्यानं संचिं
त्य ततस्तस्य हृदये अकारादि क्षकारांत वर्णात्मकं देवकरूपं वर्णध्यानं विभाव्य तस्य ललाटे मूलमंत्रस्य
वर्णसमुदायरूपं पदध्यानं संस्मृत्य तस्य शिरसि समुदायमयं मूलमंत्रस्वरूपं मंत्रध्यानं ध्यायेदि
ति शिष्यशरीरेषु षट्के संचिंत्य तं हुं चैतत्स्पृशन् गुरुः ॐ डे अमुकस्य कलाध्यानं शोधयामि स्वाहा
एवं कृत्वा तत्र षडध्वान् कृत्वा कलाध्यानं तत्ताध्व निर्विलीनं विभाव्य पुनः ॐ वर्णध्यानं शोधयामि स्वाहा

भैप
४२

इत्यष्टधाहुत्वा तत्रं गायत्रि विलीनं विभाव्य पुनः प्रणवकस्य मंत्राध्यानं शोधयामि स्वाहा इत्यष्टधाहुत्वा
तं ब्रह्मरंध्रे परमशिवे विलीनं विभाव्य पुनः संहृति प्रतिलोमेन परमशिव सकाशात मंत्राध्याने स्र
ष्ट्वा ततः पदाध्याने ततो भुवनाध्यानं ततस्तत्वाध्वानं ततः कलाध्वानं च सृष्ट्वा तत्स्थाने संस्थाप्य शि
ष्यं दिव्यदृष्ट्या विलोक्य तस्मिन्स्थितं शिष्यं चैतन्यं तं हृदयारविंद प्राणाकृष्टो नोक्तप्रकारेण तद्ब्रह्मरंध्रेण
संयोज्य ॐ भूरग्नये च पृथिव्यै च महते च स्वाहा ॐ भुवो वायवे चान्तरिक्षाय च महते च स्वाहा ॐ स्व
रादित्याय च दिवे च महते च स्वाहा ॐ भूर्भुवः स्वश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वा
हा इत्याज्याहुतिचतुष्टयं हुत्वा इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मन
सा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा
इत्याज्याहुतिं हुत्वा ॐ सहस्रार्चिर्महातेजा नमस्ते वज्रहस्तक सर्वाशिने सर्वगत पावकाय नमो
ऽस्तु ते वैरोद्रघोरकर्मा च घोरहा तेन मामिव विश्वं लोकपालस्त्वं शांतस्तत्र प्रयच्छ मे इत्यग्निं प्रा
र्थ्य अग्निमंत्रेण प्राग्वदग्निं संपूज्य ॐ स्वकाति तिलक सिद्ध्यर्थं ददामि सहुतं तिलं ॐ हुं सो — ॐ जुं सः जुं स
स्वाहा इति तिलैरेकामाहुतिं हुत्वा घृतेन स्रुवमापूर्य तदुपरि पुष्पमधोमुखं स्रुक्वेव निधाय शंखं

९८।

91

वस्त्रं पुत्रलम्भं कराभ्यां गृहीत्वोत्थाय स्रुक्स्रुवयोर्मूलेनाभौ विधाय वौषडन्तेन मूलमन्त्रेण जुहुयात् इति त्रयं
हुत्वा प्रागवत्तत्र देवं संपूज्य वह्नेः सकाशात् पूर्णकलशे विसृज्य प्रागवस्थापितस्य शिष्यस्य शिरोगतमूर्ति मन्त्रैरेके
कामायान्ये इति हुत्वा प्रागवत्प्रोक्षणेन जले नाराचं विधाय ॐ भो भो वह्ने महाशक्ते शर्वकर्मप्रसाधकः
कर्मान्तरेऽपि संप्राप्ते सान्निधिं कुरु सादरं इत्यर्घ्यं संप्रार्थ्य संहारमुद्रया तं स्वात्मनि विन्यस्य परिधायेत् प
रिस्तरणत्स्रीमग्नौ प्रक्षिप्य प्रणीतापात्रमुद्धास्य पुरतः कुशास्तरेण निधाय ॐ प्राच्यै दिशे नमः ॐ
दक्षिणायै दिशे॰ ॐ प्रतीच्यै दिशे॰ ॐ उदीच्यै दिशे नमः इति तत्तद्दिशि प्रणीताजलमुत्क्षिप्य ॐ ऊर्ध्व
ायै दिशे॰ इति भूमौ जलं निक्षिप्य भूमौ पतितजलेन स्वात्मानं शिष्यं प्रोक्षयेदिति प्रणीतोद्धास
नं विदध्यात् इति दीक्षाङ्गहोमविधिः इति श्रीभैरवाचार्यपारिजाते द्वादशः स्तवकः १२ ॥ कुशैः सं
प्रोक्षिततोनेत्रमन्त्रेण शिष्यं नेत्रे नूतनपट्टवस्त्रेण बध्वा तं हस्ते गृहीत्वा कुम्भसमीपे नीत्वा तस्याञ्जलिं
पुष्पैरापूर्य स्वयं मूलमन्त्रमुच्चरन् त्वरस्व देवतायै पुष्पाञ्जलिं दापयित्वा तस्य नेत्रबन्धमुन्मुच्य कुशा
स्तरेण समुपवेश्य अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः
इति मन्त्रं पठित्वा कुम्भे च देवं साङ्गं सावरणं सर्वोपचारैः संपूज्य प्रागुक्तभूतशुद्धिविधिना तस्य देहं संहृत्य

संशोध्योत्थाप्य तस्य देहे मूलमंत्रस्य स्वरूपाप्याय विलेन्यासज्जालां वत्सस्य पुनः ॐ भस्य देवतां गंधादि पंचो
पचारैः संपूज्य मंडपस्थाव देवताः सलोकपालागावरणदेवतागणेशादि चतुरायतन देवतास्वस्थानगा
वरणसहिता देवस्यांगे विलीनाः इति विभाव्य तेजोरूपतामापन्नं तेजोरूपं कलशजले परब्रह्ममयं स
चिंतयन् तां प्रागुक्तविधिना षडंगन्यासयोगेन सकलीकृत्य शिष्यसमलंकृतं वेदयाः समीपे सर्वतो
भद्रमंडले विरच्य तत्र तं पूर्वाभिमुखं समुपविश्य पंचवाद्यघोषपुरस्सरं गुरुः ॐ भं समइत्स ॐ भम्रवे
स्याग्रपल्लवादिकं कलशं हस्ते शाखोद्धृत्य शिष्य शिरसि निपात्य प्राग्वद्विलोममातृकामुच्चरन्॥
वेदघोषं ऊर्ध्वं ह्विः ऋत्विग्भिरन्यैश्च ब्राह्मणैः सह मूलमंत्रेण तं पूर्वाभिमुखं समुपविष्टं मन्त्रराभिमुखे सि
ञ्चन् अभिषिंच्य पुनः सर्वं सम्भावितं मत्स्वरूपिणं करकं गृहीत्वा ततो पेरक्षार्थं तमभिषिंच्य तत्
करकस्थाश्रवाशिष्टजलेन शिष्यमाचामयित्वा देवतास्वरूपं तं प्राग्वत् षडंगन्यासेन सकलीकृत्य स्व
इष्टौतेनूतनवाससी परिधाप्य स्वाचांतं तं स्वसमीपे समुपवेश्य शिष्यदेहे संक्रांतं देवं तस्यैव देहे गंधादि
पंचोपचारैः संपूज्य शिष्यदेवयोरैक्यं विभावयन् स्वविनीतस्य दक्षिणकर्णे श्रीमूलमंत्रं वारत्रयं वदेत्
शिष्यो ब्राह्मणश्चेत् तस्य गुरुस्ते मंत्रदानरूपेण उदकं दद्यात् अन्येभ्यस्त्वेवमेव वदेत् ततः शिष्यः स्वगुरुपदे दृष्टंस्म

लमंत्रं ऋष्यादिकरषडंगन्यासपूर्वकं मंत्रेणैव शतमष्टाविंशतिवारमथवा जपित्वा जपं श्रीगुरवे विधि
नासमर्प्य गुरुदेवतामंत्राणामैक्यं विभावयन् साष्टांगं गुरुं बद्ध्वा शः प्रणम्य पुनः पंचांगप्रणामेन प्र
णम्य साष्टांगपंचांगप्रमाणे योर्लक्षणमनंक्ते कुलप्रकाशतंत्रे प्रणम्य गुरवे कुर्यात् साधको भक्तिमान् सुधीः
साष्टांगं वाथ पंचांगं पूजाकर्मसमं ततः हस्ताभ्यां चरणाभ्यां च जानुभ्यां वक्षसा तथा मस्तकेन दृशा
तथा वाचा मनसा चेति साष्टांग ईरितः हस्तजानुशिरोवाक्धीभिः पंचांग ईरितः इति पंचांगप्रणामे विशेष
मा० कुलार्णवे ग्रंथितां ग्रहकोष्ठकृत्वा करौ शक्त्याथ तर्जनी जानुभ्यामवनिं गत्वा पंचांगं प्रणमेत् गुरु
मिति इत्थं प्रणम्य गुरवे दक्षिणां दद्यात् तत्र श्रीकुलार्णवे आचार्यो ज्ञानतः कुर्याच्छिष्यः सद्योऽवि
चार्य च अलंकारं सुवासांसि दद्यात् हस्तिमश्वादि दद्यात् ईश्वरार्पणबुद्ध्या तु द्विजाशीर्भिः स्वनंदितः
प्रदद्यात् गुरवे शिष्यः स्वपत्नी इं तदर्द्धेकं दशांशं वा प्रदद्याद्वित्तशाठ्यविवर्जितः तदधीनमना
नित्यं तच्चित्तेन परायणः तन्नादीश्वर जोऽस्य श्रीभवेत्साधकसत्तमः ततो नानाविधैर्भक्ष्यैर्लेह्यचो
ष्यलेह्यपेयैः ब्राह्मणान् भोजयेत्सम्यक् प्रदद्याद्दक्षिणान् इति क्रियामयी दीक्षा अथैवं वि
स्तरतः क्रियादीक्षाकर्तुमशक्तश्चेत् सर्वोपकरणानि [illegible] मंडपे शागवदेहे दिकायां मंडलं कृत्वा तथैव त

कुंडंसंस्थापनंकृत्वा असतिखिरण्णशक्तौ उत्तरवत्तरस्यमेकमेवकुंडंकृत्वा तत्राग्निस्थापनाद्यखिलकर्मकृत्वो
क्तविधिनाभिषिंच्यदीक्षांदद्यात् मंडपकरणेशक्तौ क्वाचित्प्रशस्तेस्थंडिलेप्रागेवमंडलंकृत्वा तदशक्तौ
वत्तस्वस्तिवेष्टितमष्टदलकमलंवानिर्माय तत्रोक्तविधिनाकलशंसंस्थाप्य प्रागवस्तरसंकुंडं तदशक्तौ
प्रागुक्तविधिनास्थंडिलंवाकृत्वा तत्रोक्तविधिनाग्निंसंस्थाप्य अग्निस्थापनेविस्तराशक्तौ निम्नहोमोक्तविधिना
वाग्निंसंस्थाप्योक्तविधिनाहोमादिकंकृत्वाभिषिच्यमंत्रंदद्यात् अथास्यभैरवार्चनप्रसंगाद्भैरवमंत्रोद्धारोदर्श्यते त
त्रादौ अथास्तरमंत्रः तत्रसिद्धकौलेशक्तोदिप्रभेदे व्योमवीजंसमुद्धृत्यवह्निमायासमन्वितं विंदुनादसमायुक्तं
प्रथमंवीजमुत्तमम् गौरीपवर्गमध्यस्थभीषणीप्रथमंपुनः मालिनीप्रथमंविद्धिमोहिनीप्रथमंततः मा
लिनादित्रितीयोपेतंवायुवीजंततःपरं सूर्यवीजेनसंयुक्तंतमोभाष्यन्तरोभवेत् व्योमवीजहकारः वह्निरे
फः मायाईकारः विंदुनादौविंदर्धचंद्रोपेतेन भवनीस्वरीवीजमुद्धृत्य गौरीचतुर्थंवकारः भीषणे
प्रथमंटकारः मालिनीपंचमंउकारः अवपुनः शब्देनतयोर्योगः सूचितः तेनटुइतिसिद्धं मोहिनी
प्रथमंककारः मालिनीद्वितीयंऋकारः तत्प्रकृतेनकाइतिसिद्धं वायुवीजंयकारः सूर्यवीजंभवनेश्वरी
वीजंतमः स्वरूपं आपदुद्धारणंमंत्रमुत्तमं परिकीर्तितंसर्वसिद्धिकरंसाक्षाद्भैरवेणपरिभाषितं अस्यस्त

बृहदारण्यः छन्दोनुष्टुप्छन्द उदाहृतं देवता बटुकः प्रोक्तः सात्त्वामराशीवप्रिये षडंगं संप्रवक्ष्यामि बटुकस्य विशेष
तः ह्रां ह्रीं ह्रूं ह्रैं समन्वितम् ह्रौं ह्रः प्रेव षडन्तरं बटुशब्दं परे सर्वं च मविशण्दे स्वनः हृदयाय पदं पश्चाद्धृदयं
परिकीर्तितं बटुप्रथमताय पश्चाच्छिरसे च समन्वितं शिखायै वषट् संयुक्तं कवचं बटुकाय च नेत्रं बटुकसंयुक्तं
बटुशब्दं ततः परं दंडोपपातयेत्यस्मादस्त्रमंत्रं समुद्धरेत् नमः स्वाहा वषट् वौषट् फडंतेन नियोजयेत् षडं
गमित्यारभ्य नियोजयेदिति तानो ऽस्नाकानाम ययमर्थः ह्रां बटु वमोचरहृदयाय नमः ह्रीं बटु प्रमथनाशिरसे
स्वाहा ह्रूं बटु शिखायै वषट् ह्रैं बटुकाय कवचाय हुं ह्रौं बटुकनेत्राय वौषट् ह्रः बटु दंडपातये अस्त्राय फ
ट् इति षडंगमंत्रा उद्धृत्य अत्रापि प्रागवदंगुलीदेहवक्त्रेषु पंचमूर्तियोन्यस्तव्याः द्वात्रिंशत् लक्षमानेन
जपेन्मंत्रं जितेंद्रियः जुहुयात् दशांशेन तिलैर्मधुरसंयुतैः एकविंशत्यक्षरोक्त वर्त्मना देवमर्चयेत्
अथ तं त्रैलोक्यकाम्यप्रयोगान् यथेनेन मंत्रेण साधयेदिति अथ विंशत्यक्षरो मंत्रः तत्र रुद्रयामले विस्तारोद्धा
रे प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् बटुकायेति वै पश्चादापदुद्धारणाय च कुरुद्वयं ततः पश्चाद्बटुकाय
पुनर्वदेत् देवीप्रणवमुद्धृत्य मंत्रो द्वाविंशमिष्यते इति देवीप्रणवं मायाबीजं तस्य समंते त्रेषु पंचतारविंतारो
द्धारा दोप्रणवसंकेतात् मंत्रोद्धारः स्मृतः अत्र प्रागुक्त षडंगमंत्रेषु प्रणवादेर्त्तविशेषः ऋष्यादयस्तेकविं

डा

ॐ

२

भैरव
५४

शार्ङ्गोक्तमेव अन्यमेव प्रणवोद्धितैकविंशविंशत्यक्षरो मंत्रः शारदातिलकादिषूद्धृतः एतन्मंत्रोद्देशेनै
वार्येश्वरः प्रपंचितः अथास्य मंत्रोद्धारं तं श्रीभैरवयामले अनंतो विंदुनामाढ्यो नकुलीशो भुजंगयुक् त्रिमूर्ति
श्रीमुखोम्भोतद्द्वितीयं वीजमुच्यते क्रोधीशो भुजंगनिलयस्संघोऽक्रूरसमन्वितः तृतीयं वीजमाख्यातं चतुर्थमुच्यपा
वीति भुजंगेश्वरसंवर्तमहाकालीशिरीवती वालीशानुग्रहार्धीशाश्रीमुखीभिः समुद्धरेत वटुकायपदं
स्वादापद्धारणायच उरुद्वयं समुद्धृत्य वटुकाय पुनर्वदेत द्वितीयं वीजमुच्चार्य वटुकायाशिवलभा समुद्धृतो
महेशानि चतुर्विंशाद्विवर्जितैः अनंत आकारः विंदुरनुस्वारः तेन आं इति सिद्धं नकुलीशो ह्रकारः भुजंग
रेफः त्रिमूर्तिरीकारः श्रीमुखी विंदुः एतेन मायावीजमुद्धृतं क्रोधीककारः भुजंगनिलयः रेफस्थः स
घः ओकारः अक्रूरः अनुस्वारः ताभ्यां युक्तः तेन क्रौं इति सिद्धं भुजंगेश्वरः रेफः संवर्तलकारः महाका
लीशः मकारः रेवतीरेफः वालीशः यकारः अनुग्रहः ओकारः अर्धीशः उकारः श्रीमुखी स्वारः ए
तैस्त्रिंशन्मातृकाणि वीजमुद्धृतं वटुकायस्वरूपं दीपंस्तद्वाच्यं आपदुद्धारणायस्वाहा रूपं अवनसंधिः चतुर्वि
शाद्विवर्जितैः इत्युक्तः उरुद्वयं उरुमिति वटुकायस्वरूपं द्वितीयं वीजमापदिज वटुकायस्वरूपं आशिव
लभा स्वाहा ऋषिर्ब्रह्मास्य महिष्टुप्छंदो वृहदुद्धृतः अतिस्पर्वदेवतास्य भैरवः परिकीर्तितं वेदाष्टवनिसं

व्योमाग्नेः कस्तुवाणविलोचनैः मंत्राग्नेरावरे देवी पनियुक्तैः षडंगकं वेदाश्चत्वारः मुनयः सप्त वसवः अष्टौ वाणाः
पंच विलोचने द्वे पानयनमः स्वाहा वषड्हूं च वौषट् फट्कारपंचकं जातिषट्कमिदं प्रोक्तं हृदाद्यंगेषु संपत्तमि
ति इति सोमशंभुनोक्ता अत्र हृदादीति पदेन हृदयादं शांशेन तिलैस्त्रिः स्वाहासंयुतैः शैवे पीठे यजेद्दे
वपकविंशार्णवमना इति अथाग्नेर्वर्णज्ञानार्थं पंचरात्रे पद्मरागद्युतिः श्रेष्ठो लाक्षारससमप्रभः बा
लार्कवर्णः कुंकुमकः यथार्थं सस्यते वुधैः इंद्रगोपकसंकाशः शोणितालोकपावकः वज्रचापनिभः
श्रेष्ठः कुसुंभाभस्तथैव च रक्ताग्नेः सुप्रजातिर्नो वर्णेनाथ विरिञ्चोच्यते अथ सुगंधः पद्मगंधोपेप्सिर्घृतगंधः सु
प्रोभनः आयुर्दं पद्मगंधः स्याद्बिल्वगंधश्च सुखदः नागचंपककुन्नागपाटलायूथिकानिभः पद्मेंदीव
रकल्हारसर्पिर्गुग्गुलसन्निभः पावकस्य शुभो गंधः इति अथ शब्दः जीमूतवलकीशंखमृदंगघनिनः स
कः श्रेष्ठोऽग्निः सिद्धये होमरतोन्नस्यादसिद्धिदः शारदातिलके भीतिविरिदहसोद्वत्रनिर्विद्धिः ऋपावह
ति अथाकृतिः आकारो यो द्विजश्रेष्ठ ध्वजचामरसन्निभः विमानानां हयानां च प्रसादानां वृषस्य च आ
कारोनाथहंसानां मयूराणां च सिद्धिदः तथाकृतिर्ज्ञोबसदा वह्निः सिद्धिकरस्मृतः शेषाणां दृष्टिनो
रूपं नशस्तं होमकर्माणि यत्तद्रूपं कथितं चेन यदि तस्य प्रतिलक्षणं अन्योन्यं तु प्रपश्येत तदा सिद्धिकरानलः

भैषा
९५

अथ शिखा विषमा च शिखा वह्नेः सिद्धादयशुभावहा इत्याद्युक्त्वोक्तनादीनां चाग्निजालाभासिद्धिदा मता तथा शा
रदातिलकेपि प्रदक्षिणा सलकंपाः हव्याभाः शिखिनः शिखा शुभदा यजमानस्य राज्यस्यापि विशेष
तः तथा नारदपंचरात्रे प्रदीप्ते लेलिहाने च निर्धूमे साक्षनेन तथा श्वेतत्विट्प्रदेशे चैव होतव्यं सिद्धिमिच्छता
स्निग्धः प्रदक्षिणावर्तः स्वशब्दस्यापि यो भवेत् नित्यमेवं शुभकरो व्याप्तयेण शुभोत्तमैः अथ निषिद्धः॥
अल्पतेजाश्च रूक्षश्च विस्फुलिंगसमन्वितः धूमावलीढजालश्च कृशानुर्नैव सिद्धिदः दुर्गंधश्चावलीढ
श्चमितकलुषश्च यो भवेत् भूमिं च विलिखेद्वह्निः सोपि दोषान्पराभवं तथा शारदातिलके रूक्षः कृश
गतेवर्णो यजमानं विनाशयेत् पूतिगंधो हतमुखो जोह्रतर्डः खेदप्रदो भवेत् छिन्ना ह्रस्वा शिखा कुर्यान्मर्मे
धनपरिक्षयं शुभपत्रनिभो धूमः पारावतसमप्रभः हानिर्नरगजातीनां गवां च कुरुते चितान त
घातेर्यांतरे खरोष्ट्रमहिषादीनां क्रतमात्रनसिद्धये रूक्षत्वरुचटाशब्दस्य यशाह्वागतिस्तथा दुलि
खेदप्रपंचदोषस्य यस्यापः शिखेव च नेत्रवतेसोमानि श्रेष्ठः शगासे स्मिन्याचमेस्वरे अत्रैवं विधेषु दोष
शुप्रायश्चित्तमत्रकं ज्ञानप्रकाशतंत्रे एवंविधेषु दोषेषु प्रायश्चित्तमुपदेशिकः मूलेनाज्येन जुहुया पं
चविंशतिमाहुतिरिति पंचविंशतिरेकैकस्मिन्दोषे अथ वह्नेः सात्विकादिजिह्वाभेदाः तत्रादौ सात्विकानां होम

९५

95

शांतिकादि सात्विकादिहोमेषु हिरण्याद्याः प्रयोगेवोक्ताः अथवश्यादिकाम्यहोमेषुराजसजिह्वा कुल
मूलावतारे राजसेपद्मरागैकाभवर्णेभद्रलोहिता चतुर्थीलोहितास्याश्वेता धूम्रिकात्याकरालिकेति ॥
अथक्रूरकार्येहोमेषुतामसोपि तत्रैव तामसोविश्वमूर्तिका स्फुलिंगिनीधूम्रवर्णे चतुर्थीतमनो
जवा पंचमीलोहितास्यातुकरालीगदितातथा कालिवसमसमोप्रोक्तासप्ततत्वाःकार्यभेदतः याग
क्रियाकाम्यहोमक्रूरहोमेषुचक्रमात् अथजिह्वानामधिदेवता तत्रकुलप्रकाशतंत्रे जिह्वानामधिदे
वास्तुविविधाःपितरस्तथा गंधर्वयक्षनागाश्चपिशाचाराक्षसास्तथा गंधर्वयक्षनागाश्च रसनानांसुरा
दीनांजुहुयुःकार्यसिद्धये तस्माद्यस्यतन्नोदेवावांछितंसिद्धिमृच्छतिरसनास्थीयतांभागः कृत्स्नातेषांयशो
मतारिति अत्रहोमकालेजिह्वाशिरः कर्णादिकंत्यक्त्वाजिह्वायामेव जुहुयात् तथाचोक्तं महाकपिलपंचरा
त्रे गुरुकल्पैव सर्वकार्यप्रसिद्ध्यर्थंजिह्वायांतस्यहोमयेत् चक्षुकर्णादिकंत्यक्त्वाहोमयेद्देशिकोत्तमः ॥
अग्निकर्णेहुतेयस्तुकुर्याच्चव्याधितोभयं नासिकायांमहत्दुःखंचचक्षुसोनाशनंभवेत् केशेदारिद्र्यदं
प्रोक्तंतस्माज्जिह्वासुहोमयेत् यत्रकाष्ठंतत्रकर्णोयत्रधूमस्तुनासिके यत्राल्पज्वलनंनेत्रेयत्रभस्मतत्रशि
रः यत्रैवज्वलितोवह्निः तत्रजिह्वाप्रकीर्तितेति तथाशारदातिलकेपि अस्यांततजुहुयाद्धुविपश्चित्

भैष
९९

वेकमंत्र कर्णोद्दोमेमवेष्टापिनेवेवंयतमीरितं नासिकाग्रेनमः पीठमस्तकेपनसंत्तयः सप्तमात्रिशिरः प्रोक्तो
मि सिर्दमोवक्तरेवव जलान्तशोभवेत्कर्णः काष्ठलनस्तुनाशिका ग्रथिर्विजायतेशुक्लशुद्धस्फटिकसन्निभः
नीकाष्ठंतनयविनेयंचतरंगुलमानतइति ग्रथस्त्रकरूवैतत्रशिंसिपाश्वत्य श्रीपर्णीखदिरामचंदनदेव
दारुचैर्ककतशमीपलाशोडुंवर विल्वपनसबकुलाशोकनागकेशर पुन्नागपंचककवट सप्तत्वानाम
यतमस्पशुष्कमहृएमशीर्णेभुएमदिभिरदुष्टमदिष्टमानधिकदीर्घस्थूलशुक्लेसमचतरस्रकाष्ठंदद्वी
ता तच्चतुर्विंशत्यंगुलमानेषड्विंशदंशेन विभज्यतेषुविंशतंशांदंशार्थविभज्यावशिष्टषोडशभागेष्वद्य
हेशेभागाष्टके सत्वोर्थकल्पावशिष्टभागाष्टकेन समचतरस्रांवेदींकृत्वातन्मध्येविन्दुंकृत्वा तच्चिह्नमव
लंब्याङ्गशमानेवृत्तंनिष्पाद्य तद्वहिरष्येकांशमानेनवृत्तांतरंनिष्पाद्यं तयोरंतरालेभागत्रयमि
तेमध्येवृत्ताकारांकर्णिकांस्थापयत गतेकृत्वातनवहिरङ्गाशमानेन वहि वृत्तंनिष्पाद्य तद्वहिरष्ये
कांशमानेनवृत्तांतरेकृत्वा वृत्तद्वयांतरालेष्टदलानिपरिकल्प्य तद्वहिरङ्गांशमानेनसमाकारंवि
त्रितांवाशोभांविदधात मतोग्रेवशिष्टांशेसुकांशेनवेधास्त्रतीयांशेन पार्श्वद्वयंखंडनेनमध्येकंटवि
धाय ततःकिंचिन्निम्नपमवशिष्टसमभिरंशैरग्रेकंटसमानविस्तारकंटमवयोर्मध्येकिंचित्कंटसम्मा ९९

96

ऐकं दत्तोऽस्य विस्तारस्ततो तत्रं वर्द्धमानविस्तारं समतलमधस्तादधोधः हीयमाणविस्तारं सुखं
कृत्वा सुखेऽपि वेदिवमेखलां परिकल्प्य कंदादधो सुखस्य मेखलामभिंदन् एणाकारमेखलाशमा
तनिम्नं कर्णिकाप्रवेशयोग्यं खातं कृत्वा कर्णिकामध्यस्य खातमध्यात् सुखमध्यस्य एणलोका
खातमध्ये यथा सूत्रं निःसरति तथा ताम्रलोहशलाकया कंदवेदी परिधिभेदितं सूक्ष्मच्छिद्रं विधाय तथै
वाग्रेऽपि सुख परिधिभेदितं च्छिद्रं निर्गमनाय कर्णिका प्रवेशयोग्यं रंध्रं कुर्यात् ततो वेधः षट्भागं कृ
त्वाकारं मध्ये किंचिन्निम्नमतलं सूक्ष्मोच्चय यथा तत्स्थलं तिष्ठति तथा कृत्वा सुखस्य षट्भागमध्ये किंचिन्निम्नं कृ
त्वा सुखे रंध्राय लाङ्गूलभागं हंसमुखाकारं वराहमुखाकारं वा सर्पाकारयित्वा स्तं चंद्रं समारोप्य
तद्दंडस्य ह्रिष्टमानात्किंचिदधिकं स्थूलं सवर्तुलं शालिवेष्णाकारयित्वा दंडस्य मूले ऐकांशेन कंक
णाकारं त्र्यं चतुष्टयं वा कृत्वा तदधोंऽशचतुष्टयेन सुखे कंदमध्यमूलादिस्त शोभितसूद्दंसुखं कुंभेनि
मायतदधः पुनरेकांशेन प्राग्वत्कंकणानि कृत्वा तदधोऽवंशमानस्य वर्तुलं षडंशमाने दीर्घोऽस्
त्रेणवेष्टनयोग्यस्थूलं दंडमध्यं कृत्वा तदधः पुनरेकांशेन कंकणादि तदधोंशत्रयेण प्राग्वद्दृढं सुखं
तदधः पुनरेकांशेन कंकणादि चतुर्यादि निम्नं वंनिर्माय स्तावचतुर्विंशतिभागदैर्घ्यं चतुरंशमानदैर्घ्य

स्रुवे च योगपट्टस्थूलमग्रदेशे शङ्खयमानेन वर्त्तुलाकारं स्थूलशिरोभागयुक्तं सर्ववर्त्तुलं स्रुवं निर्माय तस्याग्र
देशे एकमध्यगतमार्गयुक्तं पद्माकारं कर्षमात्रघृतग्राहित्वेन कृत्वा तदधो दण्डमूले एकांशमानेन ग्रीवा
कङ्कणानि तदधोंशत्रयेण कुम्भं ततस्तदेकांशेन पुनः कङ्कणानि ततस्तदेकादशांशमात्रमतः काष्ठं पुनरेका
शेन कङ्कणानि ततोंशत्रयेण कुम्भं पुनरेकांशेन कङ्कणानि च कुर्यादिति स्रुक्स्रुवनिर्माणप्रकारः एवं स्व
र्णरौप्यताम्रमयौ वा स्रुक्स्रुवौ कार्यौ स्रुक्स्रुवाभावे पलाशस्य मध्यपत्रद्वयं पिप्पलदलद्वयं वा गृह्
मे ग्राह्यं संस्कारोपि स्रुक्स्रुवयोरिव तस्मिन्समये पर्णयोरपि कार्यमिति अथ होमद्रव्यमानानि तत्र शार
दातिलके कर्षमात्रं घृतं होमे भक्तिमात्रं पयस्तु तत् दधि प्रसृतिमात्रं स्याल्लाजास्तु मुष्टिसम्मिता पृथुकास्त
था मानास्तु शक्तवोपि तथोदिता गुडं पलार्द्धमानं स्याच्छर्करापि तथा मता ग्रासार्द्धं चरुमानं च दिक्षुः
पर्वमित्रक्रमतः एकैकपत्रपुष्पाणि तथा सूपानि कल्पयेत् कदलीनागरङ्गाणां फलान्येकैकशो वि
दुः मातुलुङ्गं चतुःखण्डं पनसं दशधाकृतं अष्टधा नारिकेलाणि खण्डितानि विदुर्बुधाः त्रिधाकृतं बिल्वफ
लं कपित्थं खण्डितं द्विधा उर्वारुकफलं होमे कल्पितं खण्डितं त्रिधा फलान्यन्यानि खण्डानि समिधः स्युर्दे
शाङ्गुलाः दूर्वात्रयं समादिष्टं गुडूची चतुरङ्गुला व्रीहयो मुष्टिमात्रास्तु मुद्गमाषयवा अपि तण्डुलास्तु

स्तदर्द्धं शाकोऽत्र वास्तुकाष्टिश्रिमिता गोधूमा वल्लकल्माषा विहिता माषप्रिमानतः तिलाश्चुलुकमानाश्च सुः म
धुपास्तत्प्रमाणकाः शुक्तिप्रमाणं लवणं मरिचान्यपि विंशतिः पूरं वदरमानं स्याद्रामठं तत्समं स्मृतं
चंदनागुरुकर्पूरकस्तूरीकुंकुमानि च तिंतिडीवीजमानानि सर्वद्रव्याणि देशिके इति कर्षलक्षणमर्कमा
षस्तद्दशकं ज्ञास्यात्षोडशमाषो निगद्यते कर्ष इति तैलमाज्यं तदेव परिमाणं शुक्तिः कर्षद्वयं प्र
सृतिमात्रं पलद्वयमात्रं स्याद्विफलं पलार्द्धं कर्षद्वयं यामा अशीतिरक्तिकामितं तदर्कं गुंजाभिर्द
शभिर्माषः शाणो माषचतुष्टयं द्वौ शाणौ टंकः कोलो वदरं द्रंक्षणं श्चयः तौ द्वौ पाणितलं कर्ष
सुवर्णकलद्वयग्रहः पिचुर्विडालपदकं विडकोलस्तु तद्वयं स्याच्छुक्तिरष्टमिका ते द्वे पले विल्वं चतुर्थि
का माहिरात्रं प्रयुंज्यो षढे पले प्रसृतिस्तथेति मातुलंगं वीजपूरं उर्वारुकचकर्कटी तदर्द्धंशः शुक्ति
मिताः चुलकमात्राः पाणितलप्रमाणाः कर्षमात्राश्चार्घ्यः पुरुः गुग्गुलः वदरमात्रं अशीतिगुं
जामितं रामठं हिंगुः तथा नारदपंचरात्रे त्रतीयं एवं जंमूलानां द्रव्याणि स्वप्रमाणतः शैलागमे
पि एवं त्रयं स्यात्मूलानां सूक्ष्माणि पंचहोमयेव केदानामष्टमभागं लतानामंगुलद्वयमिति अथ
सामिधः नारदपंचरात्रे शमित्यादेशमात्रेण समच्छेदा विनातथा तथा विशीर्णं द्विदलाद्रूस्वास्त्र

भेग
५८

लाकृशाद्विपा कृमिदंष्ट्रासु दीर्घास्तु निस्त्रवः परिवर्जिताः विशीर्णास्तुः तयं कुर्यात द्विदलाद्याधिसंभ
वेद्भस्वायोमतस्ममाप्नोति वक्राविस्मकरीतथा स्थूलाभिर्हरते लक्ष्मी कृशायांजायते क्षयः द्विधायां
नेत्ररोगाःस्युः कोटहर्ष्यार्थनाशिनी देवंयकरते दीर्घाप्राणायोनिस्त्रवः स्मृतः सत्वीरानपिकान्तृत्वा
समिधः सर्वकामदाः आद्रत्वंमहद्भ्रामन्जमंगुलवर्तले इहप्रोक्तोमयेत्याज्ञः प्राप्नोति विपुलांश्रि
यां श्रौते स्मार्ते च तंत्रोक्ते समिधः परिकीर्तितः तथावायवीयसंहितायां तापालाभवः एवावाधिय
त्रियाद्वादशगांगुलाः अवक्राश्चसर्वशुक्कासमतव निर्व्रणाः समाद्दशांगुलावाविहिता प्रादेशमात्रा
वालाभेद्दोतव्याः सकलाश्रपि अथ प्रकृते क्रियादीक्षाशक्तानां वर्णदीक्षाविधिर्लिख्यते तत्रशुश्र
कृत्यात्मकान् अकारादिक्षकारांतान्मातृकावर्णान्मेषकृत्यात्मके शिष्यदेहे शास्त्रोक्तविधिनावि
न्यस्य पुनः संहारक्रमेण मूर्धादिहृदयांतस्य हकारं हृदयादिनाभ्यंतस्थलकारे संहरामि हृदयादिना
भिपर्यंतस्थंलकारं हृदयादिवामपादपर्यंतस्थे वकारे संहरामि हृदयादिवामपादपर्यंतस्थंसकारं
हृदयादिदक्षिणपादांतपर्यंतमकारे संहरामि हृदयादिदक्षिणपादपर्यंतस्थं सकारं हृदयादिवा
मपाणिपर्यावधिस्थं दक्षिणपाणिपर्यावधिस्थे शकारे संहरामि पंचशृंग्या शकारं वकारे संहरामि पंच ५८

युक्त्या शकारां वकारे संहरामि इत्यादि मन्त्रेण हृत्स्थमाकारं शिरःस्थे अकारे संहरामि अत्र मन्त्रयुक्त्या वर्णान् संहृ
त्य पुनः तैश्चैतन्यं सकलतत्त्वात्मतत्त्वासमवेतं परमात्मनि संयोज्य विलीनसकलतत्त्वसमूहं विगतनिखि
लकलत्वं दिव्यतनुं शिष्यं संचिंत्य पुनः परमात्मनः सकाशात् अकारादि क्षकारांतान् वर्णान् उत्पाद्य शास्त्रोक्त
सृष्टिन्यासक्रमेण शिष्यदेहे मातृकावर्णान् विन्यस्य पुनः चैतन्यं तत्तद्ग्रामसमेतं तस्मिन् संयोज्योक्त
विधिनोपदेशं कुर्यात् इति वर्णदीक्षा अथ कलादीक्षा तत्र पादतो जानुपादं पर्यंतं निवृत्तिकला
जानुतो नाभिपर्यंतं प्रतिष्ठाकला नाभितः कंठपर्यंतं विद्याकला कंठात् ललाटपर्यंतं शांतिकला
ललाटाद्ब्रह्मरंध्रांतां शांत्यातीताकलां च शिष्यदेहे संचिंत्य निवृत्तिकलां प्रतिष्ठाकलां प्रतिष्ठा
कलायां विद्याकलां च शिष्यदेहे संचिंत्य निवृत्तिकलां प्रतिष्ठाकलायां संहरामि प्रतिष्ठाकलां वि
द्याकलायां संहरामि विद्याकलां शांतिकलायां संहरामि शांतिकलां शांत्यातीताकलायां सं
हरामि ततः शांत्यातीतायाः शांतिः ततः विद्यां ततः प्रतिष्ठां ततो निवृत्तिं च सृष्टिक्रमेण शिष्य
देहे तत्तत्स्थाने संयोज्योपदेशादिकं कुर्यादिति एवमष्टत्रिंशत्कलाभिरेकपंचाशत्कलाभिर्वा प्रा
गुक्तनिरुक्तयुक्त्या संहारसृष्टिन्यासक्रमेण शिष्यं संस्कृत्य दीक्षां दद्यात् इति कलादीक्षा अथ स्पर्श

भैषा
५५

99

दीक्षा ततः गुरुः स्वहस्ततले शिवरूपं स्वं ध्यायन् मूलमंत्रं मातृकां च जपन् शिष्यस्य शिरसि स्वदक्षिणकरं
निधायोपविशेत् इति स्पर्शदीक्षा अथ वाग्दीक्षा ततः गुरुः परशिवरूपे शिवे चित्तं निधाय तद्रूपता॥
स्वमंत्रं ध्यायन् स्वयं शिष्याय मंत्रानुपदिशेत् इति वाग्दीक्षा अथ दृग्दीक्षा तत्र गुरुः स्वनेत्रे इति निमील्य
परमात्मस्वरूपिणीं मंत्रदेवतां ध्यात्वा प्रसन्नचित्तो दिव्यचक्षुषा शिष्यं निरीक्ष्य मंत्रोपदेशं कुर्यादिति ।
दृग्दीक्षा एवं क्रमेतद्दीक्षात्रयं विरक्तानां शिष्याणां तत्त्वविदा गुरुणा कार्यमिति क्षीणं तु वादीक्षा
त्रयं विरक्तानां शिष्याणां तत्त्वविदा गुरुणा कार्यमिति क्षीणं तु वादीक्षा दृग्दीक्षा वा विहिता नान्या अ
थवेधदीक्षा ततः गुरुः शिष्यस्य मूलाधारे चतुर्दलपंकजमध्ये त्रिकोणमध्ये प्राशुक्रूदुपंकूड लिनीं ध्या
त्वा तयात्र मंत्रवर्णेषु मध्यस्थवादिसांतान् वर्णान् ध्यायंस्तन्मध्यस्थिते कमलासने संहृत्य ब्रह्माणं तद
र्थगतस्वाधिष्ठानाख्ये षट्पत्रकमले मूलमध्यस्थिते विसर्गसंयोज्यवेदयित्वा तत्र षट्कमध्यस्थं बा
दिलांतं वर्णषट्कं च विसर्गसंयोज्य तद्वर्दे नाभिमंडले दशदलकमलात्मके मणिपूरकचक्रे विसर्गसं
योज्य तत्र दशमध्यस्थडादिफांतवर्णदशकं सहितं विसर्गनमस्कं जम मध्ये संहृदे संयोज्यवेदयित्वा तत
हृद्यनाहताख्ये स्वमेकादिवांतद्वादशवर्ण [illegible] ध्यद्वादशदलपंक्ते संयोज्य तैवर्तैः साईतरूतंतम्य

५५

मध्यस्थिते स्वबिंबे संयोज्य वेदयित्वा कंठदेशे षोडशस्वरान्वितषोडशदलकमले विशुद्धिचक्रे तन्मीश्वरं संयो
ज्य तैः स्वरैः सार्द्धमीश्वरं तन्मध्यस्थे सदाशिवे संयोज्य वेदयित्वा तं सदाशिवं भ्रूमध्यस्थद्विदलपंकु
जमालाचक्रे नीत्वा तत्र हक्षयुक्तदंत्यवर्णद्वयसहितं तं सदाशिवं तन्मध्यवर्तिनि ज्ञविंदौ संयोज्य वे
दयित्वा तं बिंदुं तत्र ह्रीं इंदुस्थितायां संयोज्य तां पुनर्नादे नादं नादांते नादांतं तन्मध्यांत्यां विसर्गचक्रे वि
सर्गचक्रे गुरुवक्त्रे चैतन्यं तत्रोपेतं संयोज्य वेदयित्वा जीवनामामृतसहितां कुंडलिनीं परशिवे संयोज्य वेधयेत्
एवं कृते शिष्योऽयं गुर्वाज्ञया छिन्नसंसारपाशो विसंज्ञः सद्यः क्षितितले पतति ततो गुरुः संहृतविपरी
तक्रमेणापि वै शिवात्कुंडलिनीमुत्थाप्य तां संहृतमखिलं सृष्टिक्रमेण शिष्यदेहे तत्तच्चक्रे तत्तद्दे
वतां संयोज्य हृदये जीवं मूलाधारे कुंडलिनीं संयोज्योपदेशादिकं कुर्यात् ततः संजातदिव्यवेधो
भूतभविष्यद्वर्तमानज्ञः सदाशिवो भवति इति वेधदीक्षा प्रायः कलौ वेधदीक्षा कर्त्तुं गुरुरल
ब्धोऽग्यशिष्य स्वडलमनस्त्वाद्गुरवाचार्याः प्रसंगादत्रापि लिखितो यथामति शिवं अथैवं दीक्षिता
नां सद्भक्तियुक्तानां शिष्याणां गुरुः पूर्णाभिषेकाख्यं द्वितीयमभिषेकं कुर्यात् तत्र प्रागुक्ते मण्ड
मंडपे वेदिकारहिते प्रागुक्तं विपुलं पूजाचक्रं निर्माय प्राग्वत्पंचवर्णरजोभिः कर्णिकादल

भैपा
१००

केशवकोणादिकमात्पूर्वं तत्रमध्ये लोहितोषधूपं कुंभं प्रागुक्तविधिना संस्थाप्य तत्रमध्यकुंभे देवमा
वाह्य प्रागुक्तविधिना षोडशोपचारैः संपूज्य तेषु कलशेषु तथैवावरणदेवताः संपूज्य दीक्षोक्त
विधिना शिष्यस्य जन्मनक्षत्रे शुभवत्सरे च वाद्यघोषपुरःसरं श्रीभैरवभक्तो बालमैः सह तं सम्यक्रु
द्रपूरणस्य प्रदक्षिणादिकं कृत्वा ब्राह्मणान्भूरिदक्षिणादिभिस्तोषयेदिति पूर्णाभिषेकविधिः
इति श्रीभैरवार्चापारिजाते त्रयोदशस्तवकः ॥१३॥ अथ मुद्रा ॥ तत्रादावंकुशमुद्रा कुंभमुद्रा ॥
अग्निप्राकारमुद्रा षडंगमुद्रा गालिनीमुद्रा धेनुमुद्रा शंखमुद्रा योनिमुद्रा मत्स्यमुद्रा आवा
हनादिनवमुद्रा पद्ममुद्रा गंधादिपंचमुद्रा चक्रमुद्रा ग्रासमुद्रा प्राणादिपंचमुद्रा सप्तजिह्वामुद्रा
भूतबलिमुद्रा नाराचमुद्रा संहारमुद्रा चेति त्रिचत्वारिंशन्मुद्रा तथैतासां लक्षणानि तत्रतंत्रराजे
कनिष्ठानामयोः पृष्ठे स्यादंगुष्ठस्तर्जनी कुटिला स्यात्तु मध्यमा स्यान्मुद्रा सा चांकुशाभिधेति नारद
पंचरात्रे दक्षांगुष्ठे परांगुष्ठं क्षिप्त्वा हस्तद्वयेन तु सावकाशं तेकमुष्टिं कुर्यात् कुंभमुद्रिकेति त्रि
मूलाग्नौ करोक्तनाद्यत्सस्नावभितोनयेत् अस्त्रमुद्रेयमाख्याता वह्निप्राकारलक्षणमिति नारद
पंचरात्रे मंत्राभिमंत्रयोर्धान्याणयोर्वैमानिविन्यसेत् अंगुष्ठेनावरेन्यास समन्वयाऽगुलिसमाश्रयं अंगुष्ठविष १००

100

येन्यासंतर्जनीशिरसेवहीति अस्त्रकेचित्करन्यासे अंगुष्ठाभ्यांनमः इतिन्यासमेवदंति तत्रप्रमाणंचविं
त्य वक्तव्यस्तत्रनानाएवंमलविधानांहिताहृदयपंचांगुलितलेषुच षडंगक्रमयोगेनविन्यसेत्करमेष्व
तीति षडंगक्रमयोगेनहृदयायनमः इत्यादियोगेनैवांगुलिन्यासउक्तः नारदपंचरात्रे अंगांगानिवयो
जयेत कनिष्ठाद्यानवततोहृदयादिक्रमेणत्विति हृदयादिक्रमेणहृदयायनमः शिरसेस्वाहा
इत्यादिक्रमेणेत्यर्थः शारदातिलकेपिअंगुष्ठादिषंगुलीषुन्यसेदंगैः सजातिभिः अस्त्रंतत्तल
योन्यसेत्करयोस्तालत्रयेणततः इति अंगैः ततत्वंशोक्तैःसजातिभिः हृदयायनमःशिरसेस्वाहाइत्या
दिसहितैः तथाकरणागमेनमः स्वाहावषट्हुंवौषट्फट्कारएवच जातिषट्कमिदंप्रोक्तं हृदयाद्य
ङ्गानांसंप्रुनमिति जातयःउक्ताः अतएव नमःस्वाहादीनांहृदयादिपदयोगेनैवभिधानंनांगुष्ठा
दिपदयोगेनअन्यथातत्पदयोगेनाप्यभिधीयते तल्लंन्यायादिति नारदपंचरात्रे अंगुष्ठाविर्ज्यमं
गुल्यश्चतस्रोहृदिमूर्द्धनी शिखायांमहिस्वस्यादंगुष्ठकृतनालिका सर्वांगुलयश्चानामेपाण्योःक
वचबंधने तर्जनीमध्यमानामाप्रोक्तानेत्रत्रयेक्रमात् अंगुष्ठतर्जन्यग्राभ्यांहस्तयोरभिघाहयेदिति
वतस्यप्रसारिता प्रसारिततलेनैवपाणिनाहृदयंशिरइति शैवमंत्राणांतुशैवागमेषडंगमुद्रा

भैष
·२

101

विशेषकः ॥ यथा कृत्वा मुष्टिद्वयं दोर्हस्तौ कृत्वा मुष्टी हृदि न्यसेत् हृन्मुद्रा समाख्याता शिरोमुद्रा प्रकीर्त्यते
विधि ललाटाग्रे समाख्याता [illegible] कृत्वा मुष्टिद्वयं करौ ऊर्ध्वाङ्गुष्ठप्रसक्ताग्रे तर्जन्यौ ज्येष्ठे वा प्रसृतेः करौ शि
खायां संयोज्य कृत्वा मुष्टिद्वयाकृतिः ज्येष्ठावधः प्रसक्ताग्रौ कनिष्ठा ऊर्ध्वं जस्तथा ऊर्ध्वान्तेयं शिखामुद्रा
सर्वोपद्रवनाशिनी कृत्वाङ्गुष्ठौ प्रसक्ताग्रौ तर्जन्यौ च त्रिकोणवत् मूर्ध्नि पश्चान्मुखं कृत्वा नयेदुभयपार्श्व
तः करौ हृदं तं मुद्रेयं कवचस्याभयप्रदा कृत्वा नेत्रोन्मुखं हस्तं सक्ताङ्गुष्ठकनिष्ठके प्रसार्य मध्यमां
किंचिन्नमयेदितराङ्गुली नेत्रमुद्रेयमुद्दिष्टा रत्नोन्मेषनिर्मञ्जनी परस्परतलद्वंद्वं पुनरास्फोटयेत्
भृशं तर्जन्याशाहृयेताभ्यां ज्येष्ठा प्रस्खलितात्मयेति मंत्रतत्रप्रकाशे कनिष्ठाङ्गुष्ठकौ शक्तौ करयोरि
तरेतरं तर्जनीमध्यमानामाः संहता भग्नसंज्ञिता मुद्रेषा मालिनी शोक्ता शंखसमाप्रतिचालिता इति
संहताः प्रसृतेस्य मुक्ताः सम्प्रसारिताः प्रकटिताः लक्षणं संग्रहे वामांगुष्ठं तु संगृह्य दक्षिणेन तु मु
ष्टिना कृत्वोत्तानं तथा मुष्टिं मंगुष्ठं तु प्रसारयेत् वामांगुलयस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षिणा
ङ्गुष्ठसंस्पृष्टा मुद्रेषा शंखसंज्ञका तथा मिथः कनिष्ठे च तथा तर्जनीभ्यामनामिके अनामिकाद्वयं श्लिष्ट
दीर्घमध्यमयोरधः अङ्गुष्ठाग्रद्वयं विन्यस्य योनिमुद्रेयमीरिता अधोमुखे वामहस्ते नाहृशं हस्तके विन्य

·२

स्यांगुष्ठयुग्मं तत्पार्श्वयोः सेषमार्थ्यैव दर्शयेद्दर्घ्यपात्रेण मत्स्यमुद्रेयमीरिता अथावाहनादिमुद्रा ॥
तत्रावाहनस्वरूपमुक्तं सिद्धान्तसारे स्वान्तपद्माभिमुख्यस्य ततस्तेद्धार्चनादिषु साधकं संमुखीभाव तथा
वाहनमिष्यते तथा कुलार्णवे चिन्मयस्याप्रमेयस्य निष्कलस्याशरीरिणः साधकानां हितार्थाय ब्रह्म
णो रूपकल्पनेति आवाहनावतारस्तु कुलावतारे मूलमंत्रं समुच्चार्य सुषुम्नावर्त्मना सुधीः आनीय
तेजस्स्वध्यानान्नासिकारंध्रनिर्गतं करस्थमानसंकोशजे चैतत्पुष्पमध्ये संयोज्य ब्रह्मरंध्रेण मूर्तावावा
हयेत्स्वधीरिति स्वध्यानात्स्वहृदयकमलात् सुषुम्नावर्त्मना ब्रह्मरंध्रेण नासिकानिर्गतं तेजः पुष्पस्थं च
ध्येयं संयोज्य मूर्तावानीयावाहयेदित्यन्वयः आवाहनादिमुद्रालक्षणं संग्रहे हस्ताभ्यामंजलिं बध्वा
नामिकामूलपर्वणोः अंगुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहने स्मृता अधोमुखी त्वियं चेत्स्यात्स्थापनीति निग
द्यते उच्छितांगुष्ठमुष्ट्योस्तु संयोगात्संनिधापनी अंतः प्रवेशितांगुष्ठा सैव संनिरोधिनी मता उत्ता
नमुष्टियुगला संमुखीकरणं भवेत् देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः सकलीकरणं
स्वरूपं सिद्धांतशेखरे अपि भिन्नस्वभावानां यदभिन्नप्रयोजने अंगानामंगिना सार्द्धं सकलीकरणं
त्विदमिति तथा सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी अवगुंठनमुद्रेयमभितो भ्रमिता मता अ

भैपा
·२

102

न्योन्याभिमुखौ श्लिष्टा कनिष्ठानामिकाउभे: तथैव तर्जनीमध्याये न मुद्रेयमीरिता अमृतीकरणं कुर्यात्तया
साधकसत्तमः अन्योन्यग्रथितांगुष्ठा प्रसारितकरांगुली महामुद्रेयमुदिता परमीकरणे शिवे प्रयोजयेदि
मामुद्रां देवताकरकर्मणि अतः परमघोदकेनाभ्युक्षकल्पितम् मैः प्राणप्रतिष्ठां कुर्यात् तदु[illegible]क्तं कु
लार्णवे सकलीकृत्य तन्त्राणां मन्त्रादीयानीन्द्रियाणि च प्रतिष्ठाप्य यथाविधि देवमन्यथा निष्फलं भवेदिति के
चित्तु अस्मिन् प्राणप्रतिष्ठां न प्रतिमापूजनाहृतेन कश्चित्तु बुधः कुर्यात् कुलार्णवमवाम्नयादि मन्त्रं तंत्रवच
नात् प्राणप्रतिष्ठा न कार्येत्याहुः तस्य वचनस्यावाहनादिरहितस्य केवलस्थण्डिलादेपूजनविषय
त्वात् अत एव तत्रैवोक्तं प्रतिमापूजनाहृतेश्चेति प्रतिमास्वर्पि तस्यां मंत्रमध्यामपि नयान्यत् कथमन्यथा
सकलीकरणमिति अथ योनिमुद्रा: तत्र शिवरहस्ये महादेवप्रियां योनिं कथ्यते लक्षणं च उत्क्षि
प्तेदक्षिणांगुष्ठे वामांगुष्ठेन रूंधयेत् वामांगुलीष्टदक्षिणाभिरंगुलीभिश्च वेष्टयेत् लिंगमुद्रा समाख्या
ता शिवसान्निध्यकारिणी मिथः कनिष्ठिके बद्धा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्ट दीर्घमम
ध्यमयोरधः अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता अंगुष्ठेन कनिष्ठां तु बध्वा शिष्टांगुलित्रयं प्रसार
येत् त्रिशूलाख्या मुद्रैषा परमेश्वरी अंगुष्ठा तर्जनीं तत्र ग्रथित्वांगुलित्रयं प्रसारयेदक्षमाला मुद्रेयं गिरि

·२

नंदिनी मुपः कृतोदत्तहस्तः प्रसृतोवरमुद्रिका ऊर्ध्वीकृतो वामहस्तः प्रसृतोऽभयमुद्रिका मिलित्वा
नामिकांगुष्ठे मध्यमायाणि योजयेद्येन शिष्टांगुलीरुच्छ्रिता येन गामुद्रेयमीश्वरी पंचांगुल्यो दक्षि
णा हस्तमिलिता स्तब्धसंस्थिता खड्गाख्यामुद्रा देवेशि शिवस्यातिप्रियामता पात्रवद्वामहस्तं तु हस्तांके वा
मकेतथा विध्यायोच्छ्रितवक्त्रयाम्नुद्राकापालिकाप्रिये मुष्टिं वा शिथिलां बध्वा ईषदुच्छ्रितमध्य
मा दक्षिणहृदि संन्यस्य कर्णदेशे प्रचालयेत् एषा मुद्रा डमरुका सर्वविघ्नविनाशिनी लिंग
योनित्रिशूलाक्षमालीघाभीमृगात्मिका खट्वांगाख्यकपालाख्याडमरुः शिवेनोदिता लक्षणंमेथ
हे हस्तौ वसंमुखौ कृत्वा संहृतावुन्नतांगुली तर्जनीं मिलितांगुष्ठौ मुद्रेशा पद्मसंस्मिता इयं पद्ममुद्रा देव
स्य आसने प्रदानसमये दर्शनीया अथासनानि उत्तरतंत्रे आसनं प्रथमं दद्यात्मैषं दारवमेव वा वास्त्र
वाचार्मणं कौशं मंडलं स्थानतेस्त्जेत पौष्पं पुष्पादिरचितं ऊर्णासूत्रादिसंयुतं प्रतिश्रीतिकरं देव्या समा
प्यमस्य भैरव यत्तदाहस्समद्भूतमासनं चर्मणं शुभे अन्यदारुमयं वापि दद्यादासनमुत्तमं शकटं कं
दीणयुतं दारुसारविवर्जितं चैत्यश्मशानसंभूतं वर्जयित्वा निर्मितकं अश्वदारुमयासनेविशेष
माह रुद्रयामले सांडिल्यभद्रमासनं स्पृश्यासनं हस्तमात्रकं समांगुलोच्छ्रितं दद्याद्विश्वं वा विचक्षणः

भैषा
९२

103

शाडिल्यविल्वः विल्वे शांडिल्यशैलूषौ मालूरश्रीफलावपीत्यमरः भद्रश्रीः चंदनः भद्रश्रीरोमलय
जोभद्रश्रीचंदनोस्त्रियामित्यमरः विष्टरेदर्भपिंजली तथाचमारेसमविंशतिदर्भाणांवेष्यग्रंथिभूषि
ता विष्टरेसर्वयज्ञेषुलक्षणंपरिकीर्तितमिति यद्वाविष्टरंआसनांतरं दर्भमुष्टिकाविष्टरशब्दस्यनाम्नो
त्वादिज्ञात् तथाच विष्टरोविटपिदर्भमुष्टिपीडाद्यमासनमिति हेमकोश तथाकोशलंवाकलशाणं
वास्त्वमेतद्द्वयमतेरोमंजकेवलंचैववादरंवचनवृज्ञे वास्तेषुकंवलंशाल्मासनेदेवताद्ये वास्त्वमास
नेचतद्द्वयमतमित्यर्थः वादरंकार्पासे कार्पासवादरंचेत्यभिधानात्तथा सिंहव्याघ्रतरक्षुणं छाग
स्यमहिषस्यवा गजानांतुरगानांचकृष्णसारस्यचर्मणः शाकवंचारुणंश्रेष्ठंदारवंचंदनोद्भवमिति
शाकवममचर्मजं यद्वासनंकुशमयंनदासनमनुत्तमं योगपीठस्यसदृशमासनंकोशमुच्यते तथासर्वं
योतेजसानांचआसनंश्रेष्ठमुच्यते वर्जयित्वालोहमयंकांश्यंसीसकमेवचेति अर्घ्याद्यादयः प्राग
वनिरूपिताः अर्घ्यादीनांसमयविशेषः ज्ञानमालायां आगतायतथाचार्यास्नानमासनगायच
पूजांतेगंतुकामायदद्यादर्घ्यंविचक्षणः आगतेस्नानकालेचनैवेद्योपक्रमेतथा पाद्यंस्यापित्सम
हिष्टसमयासिविधिपोद्वृषैः पाद्यंचमधुपर्केचस्नानेवस्त्रोपवीतयोः भोजनेवाचनेदेयंषट्स्वस्थाने ९२

सुगन्धवती विष्णुधर्मोत्तरे मधुपर्कं च सन्तोष्टं मनीषिभिः दध्यभावे पयः कार्यं मध्वभावे तथा गुडः घृतप्रतिनिधि
र्नास्ति तत्र यत्नं समाचरेत् तथा प्रपञ्चसारे शुद्धाभिरद्भिर्विहितं पुनराचमनीयकं शुद्धाभिरित्युक्तेः पुन
राचमनीयेत्यादि देयमिति उणीयामले [?] गन्धोदकेन मूलेन तथा शङ्खाभिषेचयेत् मद्वभिषेके सर्वत्र शं
खेनैव प्रकल्पयेत् सर्वत्रैव प्रशस्तोऽयं शिवस्याचमनं विना भुक्तः शंखः यामले पीतकौशेयवसनं वि
ष्णोरीशे प्रकीर्तितं रक्तं शक्त्यर्कविघ्नानां शिवस्य च सितं प्रियं यमहोमेन तथा छिद्रं लोमकार्पासमेव च
मन्त्रतन्त्रप्रकाशे मेरुतन्त्रे शैलादिदूषिताद्दोषः साच्छिद्रं व्ययता भवेत् जीर्णं हरिद्रताकं तं मलिनाक्रां
ति हीनं तम् कालिकापुराणे निर्दशं मलिनं जीर्णं मच्छिन्नं मात्रावलम्बितं परकीयाहृदर्थं च वि
द्धं तथा सितं धूम्रकेश मयोतं च मलमूत्रादिदूषितं प्रधानदेवताभ्यश्च देवेभ्यश्च कर्माणि वर्जयेत्स्त्रो
पयोगे च यत्नाद्दा पयोज्जते [?] आभरणानि तमस्कूटादियोगेन बहूनि सन्ति तथा योगिनीतन्त्रे गन्धः पुष्पं
तथा धूपो दीपो नैवेद्यमेव च यस्य यद्दीयते वस्त्रमलङ्कारादिकं च तं तेषां दैवतमन्त्राणां कल्पनाशोत्
णस्ङ्जने उत्सर्गमूलमन्त्रेण प्रतिनाम्ना निवेदयेत् वरुणस्य बीजेन तेषां प्रोक्षणमाचरेत् उत्सर्ग
प्रकारश्च प्रागेव दर्शितः सुवर्णं चान्यानि तु योगिनीतन्त्रे अन्नदेवता देवता लक्ष्मीरथवापि प्रजापतिः

भैप
०४

सुवर्णं वाग्निदैवत्यं रजतं चंद्रदैवतं बार्हस्पत्यं तथा वस्त्रं वानस्पत्यं फलादिकं स्फाटिकं शिवदैवत्यं प्रवा
लं सूर्यदैवतं हीरकं वरुणं ज्ञेयं रत्नानां पृथिवी तथा जलस्य वरुणो देवः पयानां वरुणस्तथा कृशरस्य
रमादेवी परमाणस्य चैव हि घृतप्रदीपके विष्णुस्तैलयोगे वनस्पतिः गंधर्वश्च तथा धूपस्याज्यस्य चैव वा।
ग्निदैवते मधु वै वारुणं ज्ञेयं दधिक्षीरं च वैश्वं वानस्पत्यं तथा पुष्पं वैश्वदेवो गंधर्व ईरितः मालायाश्च त।
था उर्गा सर्वं वा विष्णुदैवतं वानस्पत्यं तथा पुष्पं वैश्वदेवो गंधर्व ईरितः छत्रस्य यंत्रस्य एवं देवतोच्चारणं तेषां देवतमुच्चा
र्य पूजयेत् विचक्षण इति स्वयमभिधानात् उत्सर्गस्तु मूलमंत्रेण इष्टेन मूलमंत्रेण तयोत्सर्गनिवेदने इ
ति वचनात् लक्षणसंग्रहे ज्येष्ठाश्रेणकनिष्ठांशैस्तु शैलेयसम्मर्दिका गंधस्तु कालिकागुरुणा चूर्णीकृतो वा दृष्टो
वादाहृतकर्षितमेव वा रससंमर्दजो वापि प्राण्यंगोद्भव एव वा गंधः पंचविधः प्रोक्तो देवानां प्रीतिदायकः गं
धचूर्णं गंधपत्रं चूर्णं स्यात् समनस्तथा प्रशस्तगंधपुष्पानां यच्चूर्णं तिलकानि च नानागंधाश्रयानि स्मृः चूर्णं ज्ञप्रथ
मस्मृतः घृष्टो मलयजो गंधः शालश्चनमेरुणा अगरुप्रभृतिश्चैव यस्य पंकः प्रदीयते घृष्टेन घृष्टो गंधो
यं द्वितीयः परिकीर्तितः एवमेव शारदातिलके गंधश्चंदनकर्पूरकालागुरुभिरीरितः इति प्रपंचसारे
पि चंदनागुरुकर्पूरपंचगंधमिश्रोच्यत इति तथा देवदार्वागुरुब्रह्मसानरात्तचंदनात् प्रियादीनां वयोद। ०४

ग्धागरुस्तेदारुजोरसः सदारुकर्षितोगंधस्त्रनीयः परिकीर्तितः सुगंधकरवीराद्यैसुगंधलतिकांत
था सुगंधायन्मत्र[illegible] सोयोसौनिः पीजपरिगृह्यते सशंमदोद्भवोगंधसमर्दज इतीष्यते सुगनाभिसंभ
द्भूतस्तत्कोष्टोद्भवएवच गंधः श्राएणगजः प्रोक्तो मोददः स्वर्गवासिनामिति लक्षणसंयुक्ते पुष्पोपवर्ते
करेकृत्वानर्जन्यग्रेत्वयोजयेत ॥ पुष्पार्श्वत्वमद्दैवे पुष्पाख्यापरमेश्वरी पुष्पाविनमेवतत्रप्रकाशपुष्पोप
ववियं प्रोक्तमनिभिर्नामदादिभिः परापरोत्तमंचैवमध्यमंचवाधाधमं सौवर्णं पुष्पं परं प्रोक्तं अपरं विद्रुवसंज
हृदाउत्पललतापुष्पमुत्तमं परिकीर्तितं प्रथमं पत्रको याद्विमध्यमंतफलात्मके उत्कृष्टेनक्रियायोगं सदा
योज्योपरात्मरे पत्पुउत्कृष्टैर्देवभ्यो यहूतंपुनः सा क्रियायोगं नभवतीतिसर्थः परापरेति परं सौवर्णं
अपरंरवसं नैवानन्तस्रोवसदायोग्येभवतः देवबोधविसहाचार्यैरिमर्थः तोयेत्वेकतरमनुत्कृष्टंचैतम
र्थः क्रियायोग्यमितिभावः यदुक्तं त्वानार्णवे पुष्पैः पर्युषितैर्देवीनार्चयेत्कणजैरपि निर्माल्यभूतैः
हमैस्तुत्कृष्टैपरमेश्वरिरिति निर्माल्यभूतैः उत्कृष्टैः दद्दैवितियावत् उच्छिष्टैः पूजावशिष्टैः उत्त
मपुष्पाणिशारदातिलके कमलेकरवीरेहेउमदेतुलसीद्वये जातीहेकेतकीहेचकल्हारे पंचको
त्पले कुंदमंदारपुन्नाग पाटलीनागचंपके आरग्वधेकर्णिकारे पारतीनवमल्लिका सौगंधिके

भैणा
०५

सकोरंटं पालाशमशोकमल्लिका यत्नेन संसर्जिकं बिल्वं भण्डारं मानिपत्रकं अन्यान्यपि सुगंधीनि पत्रपुष्पाणि
देशिकैः उपदिष्टानि पूजायां संप्रदद्यात् नविचारणा इति अथाधमपुष्पाणि मंत्रतंत्रप्रकाशे ॥ एतेषु तुलसीश्रे
ष्ठा बिल्वदामनकं शुभं मरुको देवकल्हारो विष्णुक्रान्ता तथैव च अथापामार्गांगंधारापत्रीसहभिंसत्तिका ना
गवल्लीदलं दूर्वाकुशपत्रं तथा मतं पंचवाग्गल्यहल्लस्य पुष्पं धात्रीफलं तथेति अथ शिवस्यानिषिद्धपुष्पाणि
ज्ञानमालायां शिवे कुंदं मदं भीच स्यूथीं बकुलकेतकी जपारक्तांत्रिसंध्येच सिंहवंकुटजानिच मालती
कुसुंभं रक्तहृयारिविर्वरीसजेत् उग्रगंधमगंधं च कृमिकेशादिदूषितं अथ शुद्धे पात्रपाणिणंगवामांभिक्रान्ति
तानभिः आनीतेनार्चयेद्यस्तु भोप्रमादादपि दोषकृत् कलिकाभिस्तथान्येजं विनाचंपकपंकजैः शुष्कै
र्नपूजयेद्यस्तु भंभोप्रसादादपि दोषकृत् पत्रैपुष्पैः फलैरपि स्नातानीतैः पर्युषितैः याचितैः कलव
णिकैः सयंविकाशितैः पुष्पैः स्वयं च पतितैर्भुवि वर्जयेद्धस्तपुष्पं कांचनारं कुरंटकं सर्वपुष्पैः
सदा पूजा विहिताविहितैरपि कर्त्तव्या सर्वदेवानां भक्तिरेवात्र कारणं नारदपंचरात्रवचनात् पुष्पता
यदिवा पत्रं फलं नेष्टमधोमुखं दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणं विल्वपूजास्तु सर्वासु नविरु
द्धस्य हर्षणं अधोमुखोर्पणं श्रेष्ठं पुष्पांजलिविधौ नतत् लक्षपूजास्तु सर्वासु पुष्पमेकैकमर्पयेत् सम्पदा ०१

105

येनचेत्स्नानंलक्षंकृत्वापुण्यंननत नपर्युषितदोषोस्तिजलजोत्पलपंकजे तुलस्यागस्त्यवकुलाविल्वेगंगा
जलेतथेति लक्षणसंग्रहे श्रेष्ठश्रेष्ठेणजन्यापस्यशोदश्चमहेश्वरी धूपमदेयमाख्यातासर्वदेवप्रियंक
री धूपद्रव्याणितत्प्रपंचसारे सगुग्गुल्वगुरुसीरसिताज्यमधुचंदनैः सारांगारविनिक्षिप्तैर्मंत्रयानी
तैः प्रधूपयेत तान्निवेदनप्रकारस्तुशैवागमे धूपभाजनमंत्रेणप्रोक्षाभ्यर्च्यहृदामन्त्रेणपूजितांच
दीवादयस्तुगन्धवलंदहेत आवाहनेर्घ्यधूपेचपुष्पेनैवेद्यदीपके नित्यमेवंप्रयुंजीततन्मंत्रामंत्रितामपि
पूजाकालेविनाभ्यर्च्यहितनाम्न्यापः प्रक्षालने नातयाचविनाप्रोक्षंकुर्यान्मांसिद्धिलालसः दधानारावसा
नेवमंत्रंयदिनियदंततः मंत्रमात्रपदंचैवस्वाहान्तंरमममितिं एकादशान्तरोमंत्रंचेदायांसर्वसिद्धिदः ॥
कालिकापुराणे वामतस्तुतथाधूपमग्रेवामत्तदक्षिणे नधूपंविनिवेद्यमौनासमेनचेततथा यथातथा
पात्रगतंकृत्वातंविनिवेदयेत लक्षणसंग्रहे नेत्रश्रेणस्पशेदश्चमध्यमायासुरार्चिते दीपमदेयमादिता
सर्वदेवप्रियाशिवे प्रपंचसारे गोसर्पिषावातैलेनवाप्रावल्लुगर्भया दीपितंसरभिंशुभ्रंदीपम
स्वैप्रदीपयेत वाशह्लेनोभयोरपिमिश्रणंमतं तथाकालिकापुराणे नमिश्रीकृतमद्याद्दीपस्नेहान
घृतादिकान कृत्वामिश्रीकृतंस्नेहंतामिश्रंनरकंव्रजेत लक्षणयागे पारावतभ्रमाकारंदीपंनैवेद्यदद

भैषा
९८

दीपयेत् दक्षिणे सर्पिषा दीपं तिलतैलेन वामतः सितावर्त्तिर्दक्षिणे तु रक्तावर्त्तिस्तु वामतः कालिकापुराणे
हृत्तेषु दीपो दातव्यो न तु भौमो कदाचन ऊर्ध्वं तु स्थापितां पीठे दीपमन्त्रेण नरः सप्तमतामेन नरके मासेनैव
शतं सम लक्षणं संग्रहे अन्नमात्रं स्पृशेद्देवीं ज्येष्ठाग्रेण तु देशिकः नैवेद्यमुद्रा कथिता देवानां तृप्तिदायिनी
नैवेद्यं तु तन्त्रार्णवे शुद्धस्फटिकसंकाशं चन्द्ररश्मिसमप्रभं शालितण्डुलं देवि चारु शुद्धोदनं प्रिये ह्री
गुञ्जीरमरीचाद्यैरार्द्रकैश्च चर्चितः प्रिये वटकः कुङ्कुमाकारः पायसान्नसमन्वितं दुग्धसंभारसंभृतं शर्करा
पूरपूरितं कपिलाहृतसंयुक्तं सूपं च मण्डकाः प्रिये शर्कराकर्णिका देवि भूयस्मद्धोद्भवं तथा नानाविधा
नि येयानि व्यञ्जनानि बहून्यपि इत्यादि विविधोपेतं नैवेद्यं कल्पयेद्बुधः इति तन्निवेदनप्रकारस्तु प्रागेव प्रयो
गे दर्शितः नारदपञ्चरात्रे ग्रासमुद्रां सव्यहस्तेन प्रफुल्लकमलाकृति दर्शयन्संद्व वायूनामन्यहस्तेन कुल
कमलाकृति प्रदर्शयेत् कनिष्ठानामिकासम्यगंगुष्ठाग्रेण योजयेत् प्राणमुद्रा समाख्याता प्रथमं दर्शया
दिमान् योजयेत्तर्जनीमध्यामपानस्याथ मुद्रिका मध्यमानामिके तद्वद्व्यानमुद्रा प्रकीर्तिता तर्जनीम
ध्यमानामा तद्वन्मुद्रा उदानका सर्वाभिरंगुलीभिस्तु पंचमी मुद्रिका मता सकीयैर्मनिभिर्युक्ताः पंचमु
द्राः प्रकीर्तिताः प्राणसंज्ञस्तथापानो व्यानोदानसमन्वितः समानो ङेयुता सर्वे प्रणवाद्यादिगं तका पं

९८

106

च मंत्राः भवंतीह क्रमेणैव समीरिताः ॐ भसंभवः कर्पूरसकलैर्युक्तं नागवल्लीदलान्वितं तथाविधसमायु
क्तं नागवल्लीदलान्वितं पूगीफलमनोहरं तांबूलं वस्तुना ध्यायदत्वा कामसमन्वामयात् नारदीये पुनराचमने
दद्यात्करोद्वर्तनमेव च सकर्पूरं च तांबूलं दद्यान्नीराजनं तथा समर्घ्यमऋतुदीनि भूषणानि विचक्षणः आ
र्शयेत्तथादर्शं कल्पयेत् शत्रु चामरं नीराजनं ततः कृत्वा सोमशंभुना शिरस्यारोप्य देवस्य दूर्वादानं पवित्र
कमिति उत्तरतंत्रे पौराणिकैर्वैदिकैश्च मूलमंत्रेण चैव ही प्रदक्षिणप्रमाणं च कुर्यात् धर्मार्थसाधके ल
क्षणसंग्रहे मणिबंधस्थितौ कृत्वा प्रसृतांगुलिकौ करौ कनिष्ठांगुष्ठयुगले मिलितौ ततः प्रसारयेत् स
प्ताजिह्वाख्यमुद्रेयं प्रिया वैश्वानरस्य ही कुलार्णवे सर्वाभिरंगुलीभिश्च दद्याद्धूनबलिं प्रिये पक्षपादि
न्यो हृद्धाभ्यो मंगुलीबंधानजेमौ दंडवत्स्पृजेत् अथैवामंततः पृष्ठे दत्तमाकर्षयन्मानैः नारदमुद्रास
प्रोक्ता योज्या बलिविसर्जने लक्षणसंग्रहे अथो मध्ये वामहस्तेऽङ्गुष्ठस्पंदनहस्तकं दीर्घांगुलीरंगुली
भिः संयोज्य परिवर्तयेत् एषा संहारमुद्रा स्याद्धिसर्जनविधौ मता अथ जपकालविहितासनापि तत्रगो
रक्षसंहितायां जान्वोरंतरे सम्यक्कृत्वा पादतले उभे ऋजुकायः समासीनः स्वस्तिकं तदुदीरितं उ
स्तो वरक्षणस्ये वशिन्याः पार्श्वयोर्निक्षिपेत् पार्श्वपादौ च पाणिभ्यां हस्तौ बध्यात्मनि निश्चलः सिद्धासनं भवेदेत

त्सर्वव्याधिविषापहं एकपादमथैकस्मिन्विन्यस्योरुणि संस्थितं इतरस्मिंस्तथा चोरौ वीरासनमुदाहृतं वा
मपादमूरुणा दायदक्षिणोरोपरि विन्यसेत् तथैव दक्षिणं पादं सव्यस्योपरि विन्यसेत् पद्मासनं भवेदेतत्सर्वेषाम
पि पूजितं स्वस्तिकं पद्मकं वीरं सिद्धं चेति चतुष्टयम् जपे प्रशस्तमन्येषां प्रसंगादेव कीर्तनं गौतमीतंत्रे मा
ङ्मुखोदङ्मुखो वापि स्वस्तिकासनमास्थितः रात्रावुदङ्मुखः कार्यो देवकार्ये सदैव हि शिवार्चनं सदाप्येवं शुचिः
कुर्यादुदङ्मुखः प्राङ्मुखो वा भूत्वा प्रयतमानसैः स्वस्तिकासनमासीनः पद्मासनमथापि वा स्वयमेवोभयविधानात्
इति गदितमशेषं भैरवोपासनाया यजनजमहतादौ मास्त्रहेविधानं गुरुचरणसरोजाराधनाल्लब्धमेतत् कृतस
कृतसहृदयैर्गोपनीयं हितस्मात् १ इत्थं महाराजकुमारवर्यः श्रीजैत्रसिंह इति विश्रुतनामधेयः श्रीभैरवस्या
र्चनपारिजातं ग्रंथं व्यधेल्लकुलपद्मरविश्च कार ।२॥ तं पारिजातमधिकृत्य नरा गुरूणां कौले समस्तनिगमार्थवि
भूपालशाखे नानाप्रयोगरलकारकपुष्पपूर्णं धर्मार्थकामयुतमोदात्फलं लभेतः ३॥ इति श्रीवघेलकु
लकमलप्रद्योतनप्रचंडमार्तंडमहाराजकुमार श्रीजैत्रसिंहदेवविरचिते श्रीभैरवार्चापारिजाते चतुर्दशस्तब
कः समाप्तोयं भैरवाचार्यपारिजाते॥ शुभमस्तु ॥ ॥ ॥ ॥ ॥ः

७

मंत्रपातलग्रंथः॥